BODHĀNANDAGĪTĀ

DR. EASWARAN NAMPOOTHIRY

The present treatise is a lucid epitome of the ten principal Upaniṣads. The author Bodhānanda has admirably presented the important tenets of the Upaniṣads in a brief span of five hundred and odd stanzas in the Anuṣṭubh metre. The work is helpful for an easy understanding of the otherwise difficult and often ambiguous passages of the Upaniṣads.

Price Rs. 30.

BODHANANDAGITA

By the same author:

Sanskrit Literature of Kerala
Pramāṇalakṣaṇam (ed)
Bālarāmabharatam—A Critique on Dramaturgy
Srīkṛṣṇavijayam with
the editor's own Sanskrit commentary (under print)
Samkṣepaśārīraka — Saṁbandhokti (ed — „)

BODHANANDAGITA

Edited with Notes by

DR. E. EASWARAN NAMPOOTHIRY
Reader in Sanskrit, University of Kerala

ADI SAṄKARA SAMSKARIKA KENDRAM
TRIVANDRUM

Distributors: College Book House, M. G. Road, Trivandrum.

Printed in India at Rashtravani Mudranalaya and
St. Joseph's Press, Trivandrum. First edition: September, 1980.

Price. Rs. 30/-

PREFACE

The *Bodhānandagītā* also called *Daśopaniṣadarthatātparya-prakāśikā* is a Vedanta treatise and an epitome of the ten principal Upaniṣads, in metrical form. The author is Bodhānanda, a disciple of Brahmānandayati, as is revealed from the statements like *brahmānandayatīn natvā, bramānandāryaśiṣyeṇa* etc., occurring in the work. We know one Brahmānandayati as the author of the *Uttaragītāvyākhyā, Bhāgavataikādaśasāra, Advaitacandrikā* and *Kṛṣṇacaritasaṁkṣepa* (Mss. are available in the Mss. Libraries of Madras University and Kerala University). This Brahmānandayati was the preceptor of Tirumaṅgalattu Nīlakaṇṭhan Mūssatu (16th c. AD) as is known from his *Manuṣyālayacandrikā*. In his *Advaitacandrikā*, Brahmānanda says that he is the disciple of Madhusūdanasarasvati. Madhusūdana lived in the sixteenth century and so his grand-disciple Brahmānanda also may be assigned to the same period.

Bodhānanda has written other works also namely *Kaivalya-navanīta, Advaitaprakāśa* and *Padmanābhastuti* manuscripts of which are available in the Oriental Research Institute and Mss. Library, University of Kerala.

The *Bodhānandagītā* contains twelve chapters. The first chapter summarises the *Iśāvāsyopaniṣad* in twenty stanzas. In the second chapter which contains forty-two stanzas, the *Kenopaniṣad* is dealt with. The *Kaṭhopaniṣad* is epitomised in sixty-eight verses in the third chapter; the *Praśnopaniṣad* in the fourth chapter containing seventy-seven ślokas; the *Muṇḍakopaniṣad* in the fifth chapter containing forty-eight ślokas and the *Māṇḍūkyopaniṣad* in the sixth chapter containing twenty-five verses. In the seventh and eighth chapters, the *Brahmānandavallī* and Bhṛguvallī of the *Taittirīyopaniṣad* are summarised in thirty-nine and twenty-six verses respectively. The first and second *Adhyāyas* of the *Aritareyopaniṣad* are dealt with in the ninth and tenth chapters containing twenty-six and twenty-one verses respectively. From the *Chandogyopaniṣad* the sixth *Adhyāya* only is taken and is dealt with in the eleventh chapter containing one

hundred and eight verses. The twelfth and the last chapter deals with *Bṛhadāraṇyakopaniṣad* (fifth Adhyāya only). Thus, it may be seen that the work contains the philosophy of the ten principal *Upaniṣads*.

The present edition is prepared on the basis of two manuscripts, one obtained from Tirunāvāya Vādhyān's Illom and the other one, Ms. No. T. 532 of the University Mss. Library, Trivandrum which is a Transcript of a palm-leaf manuscript belonging to Chirakkal Raja. The original Ms. of both these is one and the same, since there is no difference in reading.

Acknowledgements

I am grateful to my revered teacher Dr. K. Raghavan Pillai, Director and Professor of Sanskrit, Oriental Research Institute and Mss. Library and Dean, Faculty of Oriental Studies, University of Kerala, for allowing me to consult the relevant manuscript from the Library. My thanks are also due to my learned friend Dr. N. P. Unni, Professor and Head of the Department of Sanskrit, University of Kerala for his sincere co-operation and encouragement.

DR. E. EASWARAN NAMPOOTHIRY

Trivandrum
7-10-80

CONTENTS

MAHAVAKYAS

PRAJÑĀNAM BRAHMA

AHAM BRAHMĀSMI

TAT TVM ASI

AYAM ĀTMĀ BRAHMA

दशोपनिषदर्थतात्पर्यप्रकाशिका

बोधानन्दगीता

प्रथमोऽध्यायः

ब्रह्मानन्दयतीन् नत्वा वाणीं गणपतिं तथा ।
दशोपनिषदामर्थः श्लोकरूपेण कथ्यते ॥ १ ॥

सर्वेषां सुखबोधार्थं बोधानन्दाख्यसूरिणा ।
मुमुक्षूणां बोधकारी मुक्तानां मोदकार्ययम् ॥ २ ॥

तस्मादत्र प्रयत्नो मे रोचते विबुधोत्तमाः ।
दृष्ट्वेमं मोदमायान्तु साहसं च क्षमन्तु मे ॥ ३ ॥

ईशावास्यमिदं सर्वं यत्किञ्चिद् दृश्यते जगत् ।
ईशोऽहमिकया भाति तस्मादहमिदं जगत् ॥ ४ ॥

ज्ञानमेतत् पालयेथाः सन्त्यज्येषणवान् भवेत् ।
तज्ज्ञानानधिकारी यं कुर्वन् वर्णाश्रमोदितम् ॥ ५ ॥

नित्यनैमित्तिकं कर्म तेन शुद्धो भवेदयम् ।
कर्म कृत्वा वर्तमानो ह्यासुरेष्वेव जन्मसु ॥ ६ ॥

जायमानो म्रियमाणो ब्रह्मादिष्वात्म हा च सः ।
पूर्वमन्त्रोदितं ब्रह्म चानेजन्मनसो जवम् ॥ ७ ॥

इन्द्रियाणामगम्यं च तान्यतीत्येव गच्छति ।
तिष्ठत्यस्मिन् निर्विकारे मातरिश्वा जगत्प्रसूः ॥ ८ ॥

अप्शब्दवाच्यं सकलं दृष्टवानिति हि श्रुतिः ।
सोपाधिकं तच्चलति नैजत्तं निरुपाधिकम् ॥ ९ ॥

अज्ञानामत्र दूरे तत्सुज्ञानामात्मरूपकम् ।
अन्तर्बहिश्च परितः व्याप्य सर्वं व्यवस्थितम् ॥ १० ॥

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
यः पश्येन्न जुगुप्सेत तस्य शोकादिकं नहि ॥ ११ ॥

तत्पर्यगात् तद्धि शुक्रं तद्देहत्रयवर्जितम् ।
कविः स्वयंभूः परिभूः तदाधारमिदं जगत् ॥ १२ ॥

तदज्ञात्वा येत्वविद्यां कर्मरूपामुपासते ।
तेऽन्धन्तमः प्रविशन्ति वि (ध १ द्य) या भूय एव तत् ॥ १३ ॥

उपासनं चेश्वराणां पूर्वोक्तान्धंतमःप्रदम् ।
असंभूतेर्मूलशक्तेस्तत्स्वरूपैक्यदं विदुः ॥ १४ ॥

उपासकश्चेश्वरादिप्रकृत्यन्तस्य याचते ।
मार्गं प्रसवितारं ते मयूखैः पिहितं मुखम् ॥ १५ ॥

सत्यस्य व्यूहरश्मींस्त्वं सत्यधर्माय दृष्टये ।
यत्कल्याणतमं रूपं तत्ते पश्याम्यहं मुदा ॥ १६ ॥

दक्षिणाक्षिगतो योऽपि सोऽहमादित्यमध्यगः ।
नत्वाहं भृत्यवद्याचे विद्धि मामात्मरूपिणम् ॥ १७ ॥

कर्मनिष्ठस्तथा मार्गं याचते स्वाग्निमात्मनः ।
ओं क्रतो त्वं हि जानासि मत्कृतं माञ्च संस्मर ॥ १८ ॥

नय मां देवयानेन पापं कर्म वियोजय ।
नम उक्तिं विधेयं ते भूयिष्ठां जातवेदसे ॥ १९ ॥

इतीशोपनिषत् सर्वा रचिता श्लोकरूपतः ।
ब्रह्मानन्दार्यशिष्येण बोधानन्दाख्ययज्वना ॥ २० ॥

इति दशोपनिषदर्थतात्पर्यप्रकाशकबोधानन्दगीतायां
प्रथमोऽध्यायः

द्वितीयोऽध्यायः

उक्तिप्रत्युक्तिरूपा सा श्रुतिरेव स्वयं जगौ ।
साधकं शिष्यवत्कृत्वा साध्यं निःश्रेयसं बुधाः ॥ १ ॥

मनः केन प्रेषितं सद् विषये पतति स्वयम् ।
प्राणश्च प्रथमो वाक् च चक्षुः श्रोत्रं युनक्ति कः ॥ २ ॥

श्रोत्रस्य प्रेरकः श्रोत्रं मनसो मन एव हि ।
प्राणवाचोः प्राणवाचौ चक्षुश्चक्षुष ईर्यते ॥ ३ ॥

तत्तद्रूपपरिज्ञानं हित्वात्मानं विविच्य च ।
तत्तत्प्रेरकमात्मानं ज्ञात्वा मुक्तो भवेद् ध्रुवम् ॥ ४ ॥

सर्वप्रेरकविज्ञानाभिन्नरूपे महेश्वरे ।
न चक्षुरादिकरणाः प्रवर्तन्ते कथं गुरुः ॥ ५ ॥

शिष्यं सम्बोधितुं शक्त इति बुद्ध्वा श्रुतिः स्वयम् ।
प्राह यद्विदितादन्यत् तथैवाविदितादधि ॥ ६ ॥

यदस्ति तत् स्वयं ब्रह्म चेति वेदविदो विदुः ।
येन वागादयः प्राणाः प्रेर्यन्ते विषयान् प्रति ॥ ७ ॥

यच्च वागादिभिः प्राणैः क्वचिन्न विषयीकृतम् ।
तद् ब्रह्मेत्यवधेयं हि यन्न वाग्भिरुपास्यते ॥ ८ ॥

इति सम्बोधितं शिष्यं पुनः प्रा (प ? ह) दृढाय वै ।
मन्यसे यत् सुवेदेति मिथ्यैव खलु तद् भवेत् ॥ ९ ॥

अस्मिन् देहे भवा देवेष्वथ तिर्यक्षु च क्वचित् ।
इति ते विदितं सम्यक् विचार्यमनुभूतिभिः ॥ १० ॥

इति श्रुत्वा गुरोर्वाक्यं रहस्ये तद् विचिन्तयन् ।
स्वानुभूतियुतः शिष्यः गर्जतीव श्रुतिर्जगौ ॥ ११ ॥

सम्यग्वेद न वेदेति न जाने छात्रमण्डले ।
यदि मत्सदृशः कश्चित् वेदैतदुभयं हि सः ॥ १२ ॥

इति शिष्यवचः श्रुत्वा गुरुस्तद्युक्तिमादिशत् ।
अकर्मकर्तृ तद् ब्रह्म सम्यग्वेद्यं कथं भवेत् ॥ १३ ॥

विदितं यदि तत् कर्म वेति चेत्कर्तृ तद् भवेत् ।
कर्मकर्तृतया ज्ञातं यस्य तन्न सुवेद सः ॥ १४ ॥

यस्याकर्तृकर्मभूतं भातं ब्रह्म स वेद तत् ।
अबुद्धिविषयं यस्य बुद्धेर्विषयतां व्रजेत् ॥ १५ ॥

न स वेद धियो यस्य विषयं तत्सुवेदसः ।
सर्वप्रत्ययबोद्धृत्वं तदबोध्यत्वमेव च ॥ १६ ॥

यस्य तद् ब्रह्म यो वेद सोऽमृतत्वं समश्नुते ।
स्वेन विन्देत यद् वीर्यं तदज्ञानविनाशकम् ॥ १७ ॥

मन्त्रौषधधनेभ्यो यद् वीर्यं तज्ज्ञानरोधकम् ।
ज्ञानान्मोक्षमवाप्नोति सत्यं वेदवचो यतः ॥ १८ ॥

शरीरेऽस्मिन् विजानाति सत्यं वस्तु तदैव सः ।
न विजानाति चेन्मर्त्यो विनाशं समवाप्नुयात् ॥ १९ ॥

अस्मिन्नर्थे श्रुतिप्रोक्तमितिहासं पुरातनम् ।
तदुच्यते विबोधार्थमहङ्कारविनाशकम् ॥ २० ॥

देवासुरमभूद् युद्धं तदा तद् ब्रह्म सर्वगम् ।
देवानां विजयं प्रादाद् असुराणां पराजयम् ॥ २१ ॥

तदज्ञात्वा ततो देवाः अहंमानावृता यतः ।
अस्माकं विजयस्त्वेष इन्द्रादीनामिदं यशः ॥ २२ ॥

इत्यमन्यन्त तज्ज्ञात्वा ब्रह्म तेषां पुरो महत् ।
यक्षरूपं समास्थाय मार्गमावृत्य तिष्ठति ॥ २३ ॥

तद् दृष्ट्वेन्द्रादयो देवाः किमेतद्यक्षमित्यपि ।
अयं जग्मुस्तदज्ञात्वा सुरा वायुं तदा ब्रुवन् ॥ २४ ॥

वायवे तद्विजानीहि किमेतद्यक्षमित्यपि ।
तथेत्युक्त्वाऽथ तान् वायुः यक्षं यत्र व्यवस्थितम् ॥ २५ ॥

तत्रागत्य स्थितस्तूष्णीं तं दृष्ट्वा यक्षरूपधृक् ।
ब्रह्म तत् प्राह कोऽसीति वायुरस्मीति सोऽब्रवीत् । २६ ॥

त्वयि किं वीर्यमिति तत् सर्वादाने स पाटवम् ।
तस्मै तृणं पुरः क्षिप्त्वा तदादत्स्व स्वशक्तितः ॥ २७ ॥

मुञ्चाथवा स्वाभिमतम् अभिमानमिहैव तु ।
इत्युक्तः सोऽप्यधावत्तं सर्ववीर्येण संवृतः ॥ २८ ॥

तृणादानेऽप्यशक्तः सन् सव्रीडः पुनराविशत् ।
नाहं समर्थो यक्षस्य स्वरूपपरिवेदने ॥ २९ ॥

एवमग्निरथेन्द्रस्तु यक्षं प्रत्यागतस्तदा
तिरोहितं तु तद् ब्रह्म तद् दृष्ट्वेन्द्रो महाधिमान् ॥ ३० ॥

अस्मिन् वियत्युमां देवीं बहुरूपां सुशोभनाम् ।
उपास्य तस्थौ सुचिरमाविरासीत् स पार्वतीम् ॥ ३१ ॥

तामुद्वीक्ष्य प्रणम्येन्द्रः यक्षरूपमिदं किमु ।
इत्यपृच्छत्तदा देवी ब्रह्मेत्याह पतिर्मम ॥ ३२ ॥

आविर्भूतं तिरोभूतं त्वदहङ्कारशान्तये ।
तद् ब्रह्म सर्वगं विद्धि सर्वस्य विजयप्रदम् ॥ ३३ ॥

पराजयप्रदं तद्वै सर्वेषां पापिनामिह ।
तदविज्ञाय हि भवान् जयो मम पराजयः ॥ ३४ ॥

असुराणां च मन्वानस्त्वहन्ताकञ्चुकावृतः ।
तथा देवाः समभवन्निति ज्ञात्वाजमव्ययम् ॥ ३५ ॥

आविर्भूय तिरोभूतमिति विद्धि सुरोत्तम ।
सर्वेषां प्राणिनां लोके सर्वव्यापारकारकम् ॥ ३६ ॥

तदधिष्ठानकं सर्वं तत्स्वरूपं सुरोत्तम ।
इति बुध्वा स्वकं मानं त्यक्त्वा ब्रह्म विभावय ॥ ३७ ॥

चित् ब्रह्म चिदिदं सर्वं जगत् स्थावरजङ्गमम् ।
चित्त्वं चिदहमन्यत्तु चितो नान्यदिति श्रुतिः ॥ ३८ ॥

उमया गदितं वाक्यमिति श्रुत्वा शचीपतिः ।
अहंमानं समुत्सृज्य बुध्वात्मानं चिदात्मकम् ॥ ३९ ॥

बुद्ध्वानथ तज्ज्ञात्वा सा च देवी तिरोदधे ।
अथेन्द्रो वायुमुख्यान् स देवानेवमबोधयत् ॥ ४० ॥

ते च देवास्तथा बुध्वा स्वाहंकारं विसृज्य च ।
सर्वं चिदात्मकं ब्रह्म बुध्वा साधनसंयुताः ॥ ४१ ॥

कृतार्था अभवन् सर्वे केनोपनिषदितीरितम् ।
ज्ञात्वा गुरुमुखाद् यो वै ब्रह्मचर्यादिसंयुतः ॥ ४२ ॥

सर्वं चिदिति संध्यायन् जीवन्मुक्तो भवेद्ध्रुवम् ।

इति दशोपनिषदर्थतात्पर्यप्रकाशकबोधानन्दगीतायां
द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः

श्रीमद्वैवस्वताचार्यो यदाह नचिकेतसे ।
कलये तत् पदं ब्रह्म स्वावशेषधियाऽन्वहम् ॥ १ ॥

ओं

उशन् ह वाजश्रवसः सर्ववेदसमाहरत् ।
नचिकेतास्तस्य पुत्रः दक्षिणार्थी हि गास्तदा ॥ २ ॥

दृष्ट्वा ताः श्रद्धया युक्तः सोऽमन्यत तदा हृदि ।
जरत्तृणाः पीतजलाः स तथा प्रजननाक्षमाः ॥ ३ ॥

कृशा गाः सम्प्रदायास्य किं फलं स्यात् क्रतोरिह ।
अतो मामृत्विजे कस्मैचिद्दत्वा फलभाक् पिता ॥ ४ ॥

भवेदिति हि मन्वानः पितरं प्राह सादरम् ।
कस्मै मां दास्यसि पितरिति त्रिष्कृत्व ऊचिवान् ॥ ५ ॥

तच्छ्रुत्वा स पिता क्रुद्धो यमायेत्युक्तवान् यदा ।
नचिकेतास्तु तच्छ्रुत्वा पर्यदेवयदेकतः ॥ ६ ॥

अहं बहूनां शिष्याणां प्रथमानां तथा स्थितः ।
मध्यमानां मध्यमश्च तादृशं त्यक्तवान् पिता ॥ ७ ॥

मया यमस्य कर्तव्यं किमस्तीति विचिन्त्य सः ।
पितरं समुपेत्याथ सत्यं त्यक्तुं न चार्हसि ॥ ८ ॥

पूर्वान् परांश्च संपश्यन् तादृशो भव विज्वरः ।
सस्यवज्जायते मर्त्यः सस्यवत्पच्यते पुनः ॥ ९ ॥

अहं यमस्य सदनं गच्छामीति त्वरा ययौ ।
तत्र गत्वा स त्रिरात्रमनश्नन् समुवास ह ॥ १० ॥

तेनैव तत्पुरं सर्वं दग्धप्रायमभूत् तदा ।
ततो यमः सहामात्यैः भार्याभिः सह बान्धवैः ॥ ११ ॥

समागत्य नमस्कृत्य सम्पूज्यार्घ्यादिभिः क्रमात् ।
भुक्तवन्तमनुप्राप्य यमः प्राह सहादरम् ॥ १२ ॥

तिस्रो रात्रीर्यदवात्सीः गृहेऽनश्नन् द्विजोत्तम ।
तत्पापशान्तये तुभ्यं त्रीन् वरान् प्रददाम्यहम् ॥ १३ ॥

पितृक्रोधोपशान्त्यर्थं वृणीते प्रथमं वरम् ।
वैवस्वतो वरं तस्मै पितृक्रोधापहं ददौ ॥ १४ ॥

स्वर्ग्यं चयनमग्न्याख्यं द्वितीयेन वृणे च सः ।
नचिकेताभिधं कृत्वा तच्च वैवस्वतो ददौ ॥ १५ ॥

अनेकरूपां सृङ्कां च ददौ तस्मै प्रहृष्टधीः ।
धारणग्रहणव्यग्रां तस्य बुद्धिं समीक्ष्य सः ॥ १६ ॥

ततोवाच तृतीयं त्वं वरं वरय सुव्रत ।
तच्छ्रुत्वा नचिकेताश्च वृणीते वरमुत्तमम् ॥ १७ ॥

प्रेत्य स्वर्गादिजान् भोगान् नरो भुङ्क्ते स्वकर्मजान् ।
केचिद्वदन्ति वेदज्ञा नेतीति ब्रह्मवादिनः ॥ १८ ॥

एतद्विषयकं ज्ञानं तृतीयेन वृणे हि सः ।
तद्बुद्धिसुपरीक्षार्थं यमः प्राह स सादरम् ॥ १९ ॥

इदं ज्ञानं सुसूक्ष्मं हि देवैश्च विचिकित्सितम् ॥
न सुज्ञेयमभूत्तेषां कथं ज्ञेयमभूत्तव ॥ २० ॥

अन्यं वरं वृणीष्वैवं न मां रोद्धुमिहार्हसि ।
नाचिकेता स्वयं प्राह यतः सूक्ष्मं ब्रवोषि मे ॥ २१ ॥

देवानां च न सुज्ञेयमस्य वक्ता त्वमेव हि ।
इति ब्रुवन्तं स यमो मोहयन्निदमब्रवीत् ॥ २२ ॥

शतायुषः पुत्रपौत्रान् गजवाजिधनानि च ।
आधिपत्यं च लोकानां वृणीष्व चिरजीविताम् ॥ २३ ॥

कामानां त्वा कामभाजं करोमि नहि संशयः ।
मर्त्यलोके दुर्लभान् त्वं वृणीष्व छन्दतः स्वयम् ॥ २४ ॥

आभिस्त्वं सुन्दरीभिश्च मत्प्रत्ता (? प्रमत्ता) भिः सुखं रम ।
परेतविषयः प्रश्नः कर्तव्यो न त्वया मुने ॥ २५ ॥

नचिकेतास्तु तच्छ्रुत्वा वाचमूचे यमं प्रति ।
श्वो भावाविषयाश्चैते मर्त्यशक्तिहरास्तथा ॥ २६ ॥

यावदीशिष्यति भवान् तावदेव हि जीवितम् ।
वित्तेनाहं तर्पणीयो न भवामि कदाचन ॥ २७ ॥

भवितव्यं भवत्येव वरणीयो वरो हि सः ।
अमराणां तु यद् भोज्यं नरो लब्ध्वा करोति किम् ॥ २८ ॥

नातिदीर्घे जीवितेऽस्मिन् को रमेत नरः सुधीः ।
यस्मिन् संशयमापन्नाः साम्पराये बुधा अपि ॥ २९ ॥

गुह्यात् गुह्यतरः सोऽयं वरो मम हि रोचते ।

यम :–

श्रेयः प्रेयश्च तेऽभिन्ने नानार्थे पुरुषाश्रिते ॥ ३० ॥

गृह्णाति यस्तयोः श्रेयः स सुखी न तथेतरः ।
धीरास्त्विमे सम्परीत्य विचार्य च यथाबलम् ॥ ३१ ॥

श्रेयो वृणीते मन्दः प्रेयो भोगार्थसिद्धये ।
कामान् तद्विषयान् बुध्वा ह्यत्यस्राक्षीरतो बुधः ॥ ३२ ॥

यस्यां मज्जन्ति बहवस्तां सृक्कां नाप्तवानसि ।
विद्याविद्ये दूरमेते विपरीते विषूचिके ॥ ३३ ॥

त्वां विद्याभीप्सिनं मन्ये यस्मान्निष्कामकृद् भवान् ।
कर्मण्यभिरता ये च मूढाः पण्डितमानिनः ॥ ३४ ॥

ते भ्रमन्तः स्वयं भ्रान्तानन्धवद् भ्रामयन्ति च ।
प्रमदेऽस्मिन् वित्तमोहान्मूढे यन्न प्रकाशते ॥ ३५ ॥

सम्परेतार्थविषयः प्रश्नो वा तस्य निर्णयः ।
अयं मूढो मन्यते ह लोक एव परो नहि ॥ ३६ ॥

इति सञ्चिन्त्य स नरो मामाप्नोति पुनः पुनः ।
न कदाचिद्विमुच्येत संसारात् घोरबन्धनात् ॥ ३७ ॥

श्रोतुं न लभ्यो यच्छ्रुत्वा बहवो न विदुश्च यम् ।
तस्य वक्ताश्चर्यभूतः श्रोताचार्यश्च एव हि ॥ ३८ ॥

वक्तृश्रोत्रोस्तु कौशल्ये सुखबोधः स दुर्लभः ।
अपरोक्षश्चिन्त्यमानो न सुज्ञेयो भवेदयम् ॥ ३९ ॥

ब्रह्मवित्प्रवरेणोक्तः संसारमलनाशकः ।
स्वबुध्युत्पन्नतर्केण न ज्ञेयः सूक्ष्मरूपतः ॥ ४० ॥

श्रुतिप्रोक्तेन तर्केण सुज्ञानाय भवेदयम् ।
धृतिमापो बतासि त्वं त्वादृक् प्रष्टा न मे भवेत् ॥ ४१ ॥

सर्वे शेवधयो नित्यास्तैर्ध्रुवं प्राप्यते न तत् ।
ततश्चितो मयाप्यग्निहृर्य नित्यैर्नित्यमाप्तवान् ॥ ४२ ॥

कामस्य जगतश्चाप्तिं भारश्चाप्यभयस्य यत् ।
स्तोमं महदूरेण्यं च यद् दृष्ट्वा त्यक्तवानसि ॥ ४३ ॥

गुहां प्रविष्टं दुर्दर्शं पुराणं गगनाभिधम् ।
निरोधान्मानसौ दृष्ट्वा हर्षशोकौ जहाति च ॥ ४४ ॥

श्रुत्वैतन्मननात् सद्यः सूक्ष्मं रूपमवाप्य च ।
मोदनीयं च लब्ध्वा स मोदते सुचिरं त्विह ॥ ४५ ॥

नचिकेता इति श्रुत्वा वैवस्वतमुवाच ह ।
धर्माधर्माकृतकृतभूतभव्यादिहीनकम् ॥ ४६ ॥

ब्रह्म यत् पश्यसि त्वं मे तन्मृत्यो ब्रूहि निश्चितम् ।

वैवस्वत :–

वेदाः सर्वे यत्पदं प्राहुरग्र्यम्
तपांसि सर्वाणि च साधनानि ।
यस्यैव यज्ञाः क्रतवो ब्रह्मचर्यम्
तदोंकारगम्यं परमं ब्रवीमि ॥ ४७ ॥

ओमित्येतत्परमं ब्रह्म गुह्यं
ओमित्येतत् सकलं विश्वरूपम् ।
ओमित्येतद् रागमोहादिरूपम्
ओमित्येतच्छान्तिदान्त्यादिरूपम् ॥ ४८ ॥

ओङ्कारालम्बनं श्रेष्ठं ओङ्कारालम्बनं परम् ।
ओङ्कारालम्बनं बुध्वा सर्वान् कामानवाप्नुयात् ॥ ४९ ॥

विपश्चिन्नैव जायेत न म्रियेत कदाचन ।
शरीरे हन्यमानेऽपि स्वयं तु न विहन्यते ॥ ५० ॥

हननस्य तु कर्तारं कर्म भूतं च वेद यः ।
न स वेद स्वकं रूपं अणुत्वात्तदणीयसाम् ॥ ५१ ॥

महीयसां महद् ब्रह्म तद्वेत्तुं को भवेत् क्षमः ।
समदुःखसुखी वेत्ति प्रसादान्मनसः सुधीः ॥ ५२ ॥

दूरस्थितो व्रजेद् दूरं श (शा ? या) नः सर्वगो भवेत् ।
मदामदं तमात्मानं मदन्यः को नु वेत्त्यहो ॥ ५३ ॥

अनित्येषु शरीरेषु नित्यं ध्रुवमवस्थितम् ।
महान्तं विभुमात्मानं बुध्वा शोकं जहाति हि ॥ ५४ ॥

मेधाप्रवचनाभ्यां च श्रुतेर्वात्मा न लक्ष्यते ।
यस्तमेव भजेत्तेन लभ्य आत्मा स्वरूपतः ॥ ५५ ॥

सुचरित्रः शान्तियुक्तः प्रज्ञानेनैनमाप्नुयात् ।
ब्रह्मक्षत्रादयो भावा ओदना यस्य सेचनम् ॥ ५६ ॥

मृत्युस्तं वेद यो विद्वान् स आश्व (? चा) र्यो भवेद्ध्रुवम् ।

लोके पिबन्तौ सुकृतस्य कर्मणो
गुहां प्रविष्टौ फलभोक्तृसाक्षिणौ ।
जीवेश्वरौ तौ परमे परार्ध्ये
छायातपौ ब्रह्मविदो वदन्ति ॥ ५७ ॥

रथं शरीरं रथिनं विध्यात्मानं तथा दश ।
इन्द्रियाणि हयान् विद्धि प्रग्रहन्तु मनस्तथा ॥ ५८ ॥

विद्धि मार्गांस्तु विषयान् सारथिं बुद्धिरूपिणम् ।
मन आत्मेन्द्रियधियां समाजं भोक्तृरूपिणम् ॥ ५९ ॥

अयुक्तमनसो पश्यन्निन्द्रियाणि हया इव ।
तानि संयुक्तमनसो पश्यन्तीत्यवधारय ॥ ६० ॥

शिक्षितः सारथिर्यस्य प्रग्रहश्च द्द (ष्ट ? ढ) स्तथा ।
सुशिक्षिताश्च हयाः सोऽध्वनः पारमश्नुते ॥ ६१ ॥

अर्थेन्द्रियमनोबुद्धिमहदव्यक्तपूरुषाः ।
पूर्वपूर्वापेक्षया तु विज्ञेयो ह्युत्तरः परः ॥ ६२ ॥

पुरुषान्न परः कश्चित् सा काष्ठा सा परा गतिः ।
एष गूढोधीगुहायां दृश्यते सूक्ष्मदर्शिभिः ॥ ६३ ॥

तत्साक्षात्कारसिद्ध्यर्थं यच्छेद्वाचां मनो वशे ।
तच्च बुद्धौ तां च महत् तत्वे तच्छान्त आत्मनि ॥ ६४ ॥

तस्मात्तूर्णं बन्धमुक्त्यै देशिकस्योपसर्पणम्
कार्यं नृभिर्नान्यथा हि बन्धमुक्तिर्भविष्यति ॥ ६५ ॥

शब्दस्पर्शादिरहितं सुखमाद्यन्तहीनकम् ।
ब्रह्मपूर्णं स्वमात्मानं विदित्वामृतमश्नुते ॥ ६६ ॥

यमप्रोक्तं नाचिकेतमुपाख्यानं सुमुक्तिदम् ।
उक्त्वा श्रुत्वा च मेधावी ब्रह्म विज्ञानमाप्नुयात् ॥ ६७ ॥

श्राद्धकाले च पठितं पितॄणां मुक्तिदायकम् ।
विबुधानां समीपे च तेषां सन्तोषकारणम् ॥ ६८ ॥

इति दशोपनिषदर्थतात्पर्यप्रकाशकबोधानन्दगीतायां
तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः

ओम्

सुकेशादिशिष्यपूगपिप्पलादार्ययारिह ।
यत्प्रश्नोत्तरसंसिद्धं तं निष्कलपदं भजे ॥ १ ॥

भारद्वाजः सत्यकामो गार्ग्यश्चैवाश्वलायनः ।
कात्यायनश्च वैदर्भिः पिप्पलादमुपेत्य ते ॥ २ ॥

अधीहि भगवन् ब्रह्मेत्येवमूचुर्महर्षयः ।
उपसन्नान् स तान् दृष्ट्वा पिप्पलाद उवाच ह ॥ ३ ॥

वत्स्यथ ब्रह्मचर्येण संवत्सरमतन्द्रिताः ।
मामागत्य ततः प्रश्नान् यथाकाममपृच्छत ॥ ४ ॥

यदि ज्ञास्यामि वो वक्ष्ये युष्मत्प्रश्नोत्तरं त्वहम् ।
ऊषुस्ते ब्रह्मचर्यं तन्निकटे छत्रवृत्तयः ॥ ५ ॥

कात्यायनस्तथोपेत्य पिप्पलादमुवाच ह ।
भगवन् कुत एता वै प्रजायन्ते प्रजाः कथम् ॥ ६ ॥

प्रजापतिः प्रजाकामः मिथुनं तपसासृजत् ।
सूर्यचन्द्रात्मकं तत्र चन्द्रो मूर्त्यात्मकोऽभवत् ॥ ७ ॥

सूर्यः प्राणोऽभवत्तत्र ताभ्यां सर्वमिदं जगत् ।
प्रजापतिर्वत्सरोऽभूत् आदित्यस्तूत्तरायणम् ॥ ८ ॥

दक्षिणं नयनं चन्द्रः ततो मासः प्रजापतिः ।
शुक्लपक्षस्तथादित्यः कृष्णपक्षस्तु चन्द्रमाः ॥ ९ ॥

प्रजापतिस्त्वहोरात्र आदित्योऽहस्तथाऽभवत् ।
चन्द्रो रात्रिस्समभवद् रतिरह्नि निषिध्यते ॥ १० ॥

रात्रौ विधीयते सा हि ब्रह्मचर्यफलप्रदा ।
अन्नं प्रजापतिश्चन्द्रो रेतस्तथा रविः ॥ ११ ॥

ततः प्रजाः प्रजायन्ते सूर्यचन्द्रात्मकं जगत् ।
इति ज्ञातवतां पुंसामयनं ह्युत्तरं सदा ॥ १२ ॥

पक्षः शुक्लोऽहरन्येषामितराणि सदाभवन् ।
प्राजापत्यव्रतं ह्येतत् ज्ञात्वा मिथुनहेतुकम् ॥ १३ ॥

चरन्ति तेषामेवैष ब्रह्मलोक इति श्रुतः ।
न येषु जिह्ममनृतं माया चेति श्रुतिर्जगौ ॥ १४ ॥

वैदर्भिस्तं समागत्य पप्रच्छ भगवन्निह ।
कति देवाः प्रजाः सर्वा धारयन्तो प्रकाशकाः ॥ १५ ॥

एषां वरिष्ठः को वा स्यादिति पृष्टस्तु सोऽब्रवीत् ।
आकाशदेवः सर्वेषां विधारक इति श्रुतिः ॥ १६ ॥

वाय्वग्न्यापः पृथिवी वाङ्मनो दृक् श्रुतिस्तथा ।
प्राणश्चाधारभूतो वै तेन्योन्यं कलहं ययुः ॥ १७ ॥

अहं वरिष्ठ इति तान् प्राणः प्रोवाच सादरम् ।
अहं वै पञ्चधात्मानं प्रविभज्य कलेवरम् ॥ १८ ॥

अवष्टभ्य सदा सर्वं धारयामि न संशयः ।
ते श्रद्दधाना अभवन् श्रुत्वा प्राणवचस्तदा ॥ १९ ॥

प्राणाभिमानात्तद्देहादुत्क्रामिष्यन् यदा तु ते ।
उत्क्रान्ता सर्व एव स्यू राजानं मक्षिका इव ॥ २० ॥

ऊचुस्ते प्राणमासाद्य नोत्क्रामीस्त्वं हि नो गतिः ।
त्वं वरिष्ठः पिता त्वं नः सूर्यस्त्वं ज्योतिषां पतिः ॥ २१ ॥

वाचि श्रोत्रे चक्षुषि च या स्तन्वस्ते व्यवस्थिताः ।
नोत्क्रामीस्ताः स्थापय भो त्वमेषां परिरक्षिता ॥ २२ ॥

पितॄणां त्वं स्वधाकारः स्वाहा दिविषदामसि ।
ऋषीणां चरितं त्वंहि व्रात्यस्त्वं पूर्वजन्मतः ॥ २३ ॥

दातारो वयमाद्यस्य विश्वस्यात्ता च सत्पतिः ।
अतोऽस्मासु विविश्य त्वं श्रियं प्रज्ञां च धेहि नः ॥ २४ ॥

इति श्रुतौ श्रुतो यस्मात् प्राण एव विधारकः ।
प्रकाशकः प्राण एव प्रज्ञारूपेण सूक्ष्मतः ॥ २५ ॥

वरिष्ठः प्राण एवेति विद्धि त्वमवधारय ।
वायुना विधृतं सर्वं जगत् स्थावरजङ्गमम् ॥ २६ ॥

बुध्वा प्राणमुपास्व त्वं पूर्वोक्तैः साधनैर्युतः ।
इति श्रुत्वा तु वैदर्भिर्विरराम प्रहृष्टधीः ॥ २७ ॥

आश्वलायन आगत्य पिप्पलादमथाब्रवीत् ।
भगवन् कुत एषो ह जायते प्राणसंज्ञकः ॥ २८ ॥

शरीरे कथमायाति स्वयं स्वं विभजेत् कथम् ।
कथमुत्क्रमते प्राणः कथमध्यात्ममित्यपि ॥ २९ ॥

इति पृष्टः पिप्पलादस्तस्योत्तरमथाब्रवीत् ।
अतिप्रश्नान् पृच्छसि त्वं ब्रह्मिष्ठोऽसि यतो ब्रुवे ॥ ३० ॥

जायते प्राण आकाशाच्छायेव पुरुषादतः ।
एतेनैव ततं सर्वं जगत् स्थावरजङ्गमम् ॥ ३१ ॥

देहे प्रविश्य स्वात्मानमीश्वरेच्छावशादथ ।
विभज्य पञ्चधाऽपानात् पायूपस्थे विगाह्य च ॥ ३२ ॥

हृदि स्थितः स्वयं चक्षुःश्रोत्रनासे तथा मुखम् ।
नाभौ समानः सन्तिष्ठन् हुतं सर्वं समं नयेत् ॥ ३३ ॥

तस्मात् सप्तार्चिषो देहे प्रज्ज्वलन्ति समन्ततः ।
हृदि नाड्यस्त्वेकशतमेकैकस्या विनिर्गताः ॥ ३४ ॥

द्वासप्ततिसहस्रास्तास्तासु व्यानश्चरन् स्थितः ।
उदानस्त्वेकया पुण्यात् पुण्यं दैवं नयेदमुम् ॥ ३५ ॥

तिर्यञ्चं पापबाहुल्यादुभाभ्यां मर्त्यजन्म च ।
बाह्यः प्राणस्तथादित्यो ह्यनुगृह्णाति चाक्षुषम् ॥ ३६ ॥

पृथिव्यां देवताया साऽपानानुग्रहदायिनी ।
समानः परमाकाशस्तेजो व्यान उदाहृतः ॥ ३७ ॥

तस्मादुत्क्रान्तिकाले तु सोदानः शान्ततेजसः ।
मनस्संयुक्तमाभासमिन्द्रियैर्विपर्ययैर्युतम् ॥ ३८ ॥

गृहीत्वा प्राणमायाति स प्राणस्तेजसा युतः ।
यथासङ्कल्पितं लोकं नयेदात्मानमञ्जसा ॥ ३९ ॥

प्राणं यो वेद तत्त्वेन स प्राणो न हि संशयः ।
न हीयन्ते प्रजास्तस्य सोऽमृतत्वञ्च विन्दति ॥ ४० ॥

अथ गार्ग्यस्समागत्य पप्रच्छ भगवन्निति ।
संबोध्य पुरुषे कानि स्वपन्त्यस्मिंश्च जाग्रति ॥ ४१ ॥

स्वप्नं पश्यति कतरः सुखं कस्य विजायते ।
कस्मिन् सर्वाणि भूतानि सम्प्रतिष्ठन्ति देशिक ॥ ४२ ॥

पिप्पलादस्तु तं प्राह तदुक्तीश्च विमृश्य सः ।
सूर्यस्य रश्मयो गार्ग्य गच्छतोऽस्तं तु मण्डले ॥ ४३ ॥

एकीभवन्ति च पुनः निर्गच्छन्त्युदयेऽस्य वै
एवं जाग्रद्विरामे तु सर्वं मनसि संस्थितम् ॥ ४४ ॥

तेन तर्ह्येष पुरुषो न शृणोति न पश्यति ।
तदैनं स्वपितीत्याहुः स्वं ह्यपीतो भवत्ययम् ॥ ४५ ॥

प्राणाग्नयः सदा स्वप्ने जाग्रतीति श्रुतिर्जगौ ।
महिमानं तदा देवः स्वप्नं पश्यति पूर्वजम् ॥ ४६ ॥

श्रुताश्रुतेऽदृष्टदृष्टेऽनुभूतानुभूतिजम् ।
सर्वं पश्यति सर्वोऽपि तेजसाऽभिभवो यदा ॥ ४७ ॥

तस्मिन् देवे विनीयन्ते मन आदीन्द्रियाण्यपि ।
विषयाश्च तदा देव स्वप्नान्नानुभवत्ययम् ॥ ४८ ॥

सुखमात्रेण सन्तिष्ठेत् सौषुप्त इति कथ्यते ।
यस्तु सौषुप्तिको देव आनन्दमय उच्यते ॥ ४९ ॥

निरुपाधिस्वरूपेण स नित्यः शुद्ध इत्यपि ।
निर्विकारः पराकाशः परमात्मेति कथ्यते ॥ ५० ॥

सोयं हि विज्ञानमयः स्वाप्निकः पुरुषोत्तमः ।
सोयमेवानन्दमयः सौषुप्तिक उदाहृतः ॥ ५१ ॥

स एव निर्विकारात्मा निरुपाधिस्वरूपतः ।
पराकाशस्वरूपस्त्वमहमादि विभेद हा ॥ ५२ ॥

इति ज्ञात्वा स्वमात्मानं परमानन्दरूपिणम् ।
कृतकृत्यो विज्वरश्च गार्ग्यास्मिन् स्वं सुखं चर ॥ ५३ ॥

एतज्ज्ञानस्य संगुप्त्यै साधनैः संयुतो भव ।
इति संबोधितो गार्ग्यः कृतकृत्योऽभवत्तदा ॥ ५४ ॥

सत्यकामस्तथासाद्य पिप्पलादमपृच्छत ।
भगवन् प्रणवोपास्तेर्विधिं ब्रूहि फलं तथा ॥ ५५ ॥

सत्यकामः शृणुष्वेदं प्रणवस्तु त्रिमात्रकः ।
य एकमात्रं प्रणवमभिध्यायीत सादरम् ॥ ५६ ॥

तन्नयन्ति ऋचो लोकं मानुषं तपसा वृतः ।
सत्यादिसंयुतस्तत्र विभूतिमनुभूयते ॥ ५७ ॥

यो वा तं तु द्विमात्रेण चाभिध्यायीत सादरम् ।
यजूंषि तं सोमलोकं नयन्ते तत्र स द्विजः ॥ ५८ ॥

विभूतिमनुभूयाथ पुनरावर्तते भुवि ।
यो वा तं तु त्रिमात्रेण ह्यभिध्यायीत मानवः ॥ ५९ ॥

स पाप्मभ्यो विनिर्मुक्तः पादोदर इव त्वचः ।
सूर्ये तेजसि सत्वं नः साममिर्नीयते ध्रुवम् ॥ ६० ॥

ब्रह्मलोकं तत्र गत्वा स्वकं पुरुषमीक्षते ।
स तेन सह संयुक्तः कालेनैव विमुच्यते ॥ ६१ ॥

अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम् ।
ओङ्कारं यो न जनाति ब्राह्मणो न भवेत्तु सः ॥ ६२ ॥

इत्युक्तः सत्यकामस्तु सन्तुष्टहृदयो भृशम् ।
पिप्पलादं गुरुं नत्वा तस्मादुपरराम ह ॥ ६३ ॥

भारद्वाजः समागत्य पिप्पलादमथाब्रवीत् ।
हिरण्यनाभः कौसल्यो मामपृच्छन्नृपात्मजः ॥ ६४ ॥

वेत्थ त्वं षोडशकलं भारद्वाजेति मां पुरा ।
नाहं वेदेत्यब्रुवं तं यदि ज्ञास्यामि ते ब्रुवे ॥ ६५ ॥

परिशुष्येत् समूलः सः योऽनृतं वदतीश्वरे ।
तस्मान्नार्हाम्यसत्यं ते वक्तुमित्युक्तवांस्तदा ॥ ६६ ॥

तत्त्वां पृच्छामि भोः स्वामिन् पुरुषाः कुत्र तिष्ठति ।
कलास्तस्मात् कथं जाताः किंरूपास्तच्च मे वद ॥ ६७ ॥

इति पृष्टः पिप्पलादो भारद्वाजमथाब्रवीत् ।

पिप्पलादः—

पुरुषोन्तरिहैवास्मिन् शरीरे सुव्यवस्थितः ॥ ६८ ॥

कस्मिन्नुत्क्रान्त उत्क्रान्तः सुस्थिते सुस्थितोऽस्म्यहम् ।
स प्राणमसृजत् श्रद्धामित्यालोच्य खमादितः ॥ ६९ ॥

पृथिव्यन्तं चेन्द्रियाणि मनोऽन्नं वीर्यमित्यपि ।
तपोमन्त्रांस्ततो लोकान् नामानि विविधान्यपि ॥ ७० ॥

एताः कला षोडशेति प्रसिद्धा हि श्रुतौ स्मृतौ ।
पुनस्तस्मिन् विलीयन्ते ह्यर्भांसीव महार्णवे ॥ ७१ ॥

स्यन्दमाना यथा नद्यः विलीयन्तेऽर्णवे यदा ।
तदा तासां नामरूपे भिद्येते सिन्धुरेव ताः ॥ ७२ ॥

तद्वत् कलाः कारणेऽस्मिन् लीयन्ते पुरुषे यदा ।
तदा तासां नामरूपे भिद्येते पुरुषे हिताः ॥ ७३ ॥

अकलः पुरुषो योऽसावभयोऽमृत एव च ।
तं वेद्यं पुरुषं वेद स्वात्मानं मुच्यते बुधः ॥ ७४ ॥

स एव परमाकाशः खं ब्रह्मेत्यादिवाक्यतः ।
श्रुतेरनुभवाच्चापि विदुषां निश्चयो हि सः ॥ ७५ ॥

एवं निश्चयमापन्ना नित्यमुक्ता भविष्यथ ।
नातःपरं वेदितव्यम् अस्ति सत्यं ब्रवीमि वः ॥ ७६ ॥

ब्रह्मचर्यमहिंसां च सत्यं चैवापरिग्रहम् ।
रक्षध्व श्रद्धया यूयमेतज्ज्ञानस्य गुप्तये ॥ ७७ ॥

इति श्रीबोधानन्दगीतायां चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः

यद् ब्रह्माश्रित्य वर्तेते विद्याविद्ये महादिमे ।
तदपह्नवसंसिद्धं भजेऽहं परमाक्षरम् ॥ १ ॥

देवानां प्रथमो ब्रह्मा कर्ता विश्वस्य सत्पतिः ।
अथर्वाय ब्रह्मविद्यां ज्येष्ठपुत्राय सोऽवदत् ॥ २ ॥

अथर्वा ह्यङ्गि (रे ? रसे) प्रादात् भारद्वाजाय सोऽददत् ।
भारद्वाजश्चाङ्गिरसे प्रादाद्विद्यां परापराम् ॥ ३ ॥

अङ्गिराः शौनकायादात् महाशालाय सादरम् ।
पप्रच्छ शौनको यस्मिन् विदिते विदितं भवेत् ॥ ४ ॥

सर्वं तत्परमं ब्रूहि येन मुक्तो भवाम्यहम् ।
द्वे विद्ये वेदितव्येति वदन्ति ब्रह्मवादिनः ॥ ५ ॥

अपरा च परा चेति तत्राद्या वेदरूपिणी ।
षडङ्गसहिता त्वन्या पराक्षरविबोधिनी ॥ ६ ॥

अदृश्यमव्यवहार्यमग्राह्यं देहवर्जितम् ।
नित्यं विभुं सर्वगतं भूतयोनिं विदुर्बुधाः ॥ ७ ॥

ऊर्णनाभेर्यथा तन्तुर्भुवश्चौषधयो यथा ।
पुरुषात्केशलोमानि सम्भवन्ति यथा तथा ॥ ८ ॥

अक्षरादभवद्विश्वमिति वेदविदो विदुः ।
आलोच्य वृद्धिमगमत्तदाकाशं समुद्भवौ ॥ ९ ॥

ततो वायुस्ततो ह्यग्निर्जलं पृथ्वी ततः क्रमात् ।
तत ओषधयो लोका कर्म तत्फलमेव च ॥ १० ॥

वेदोक्तानि च कर्माणि समाचरथ सुव्रताः ।
समिद्धेऽग्नावाज्यभागावन्तरेणाहुतीर्हु(ने ? ये)त् ॥ ११ ॥

यस्याग्निहोत्रं दर्शादिकर्मवर्जितमास्तिकाः ।
आ सप्तमान् तस्य लोकान् हिनस्तीति श्रुतेर्विधिः ॥ १२ ॥

यस्याग्निहोत्रं सुहुतं यथाकालं यथाविधिः ।
सूर्यस्य रश्मयो भूत्वा नयन्त्याहुतयस्तु तम् ॥ १३ ॥

देवतानां पतिर्यत्र ऋषयः सप्त तत्र वै ।
तमेह्येतीत्याहुतयो वहन्त्यः सूर्यरश्मिभिः ॥ १४ ॥

नयन्ति ब्रह्मलोकान्ता एतावत्कर्मणः फलम् ।
अष्टादशोक्तं यत्कर्म निकृष्टं नाशहेतुतः ॥ १५ ॥

एतच्छ्रेय इत्युक्त्वा भ्रमन्त्यत्र कुबुद्धयः ।
ते जरां यान्ति मृत्युं च विद्यायामन्तरे स्थिताः ॥ १६ ॥

पण्डितंमन्यमानास्ते ह्यन्धनीता यथान्धकाः ।
कर्मण्यधिरतास्ते वै कृतार्था लोकगामिनः ॥ १७ ॥

पुण्यक्षयाच्च्यवन्त्येते पुनर्जन्मैकभूमयः ।
वानप्रस्थे वर्तमानास्तपस्तप्त्वा सुदुश्चरम् ॥ १८ ॥

सूर्यस्य द्वारतस्ते वै ब्रह्मलोकं प्रयान्ति हि ।
ते चापि पुनरायान्ति ततो वेदविदो विदुः ॥ १९ ॥

कर्मार्जितान् सर्वलोकान् परीक्ष्यानित्यरूपिणः ।
न कृताः कर्मणा लभ्य इति निर्वेदमाप्य च ॥ २० ॥

विज्ञानार्थं सद्गुरुं सम्प्रगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।
तस्माद्विद्यां सम्प्रतिष्ठां समूलाम्
अवाप्य सम्यङ्मननादिभिस्ताम् ॥ २१ ॥

निश्चित्य सर्वं परमात्मतत्त्वं
विहृत्य चान्यत् प्रविशेत् सुखं खम् ।
विज्ञानमात्मानमखण्डतत्त्वं
ध्यायेत् परं नित्यसुखाप्तये बुधः ॥ २२ ॥

अभ्याहिताग्नेर्मनसो विस्फुलिङ्गा
यथा सुदीप्तात् प्रभवन्ते सरूपाः ।
जीवास्तथा ब्रह्मणः सौम्यभावाः
प्रजायन्ते चापि यान्त्येव तत्र ॥ २३ ॥

अमूर्तः पुरुषो दिव्यः बाह्याभ्यन्तरवर्जितः ।
क्षराक्षराभ्यां च परः मनः प्राणादिवर्जितः ॥ २४ ॥
आकाशादिपृथिव्यन्ताज्जायन्तेऽस्मान्न संशयः ॥ २४–१ ॥

अग्निर्वक्त्रं मस्तकं द्यौश्च यस्य
सूर्यश्चक्षुः प्रदिशः श्रोत्रमास्यम् ।
वाचो वेदाश्चन्द्रमा गुह्यमस्य
वायुः प्राणो देह आकाश एव ॥ २५ ॥

पादौ भूमिः सोयमेवाखिलात्मा
तिष्ठत्येकः सर्वतो व्याप्य विश्वम् ॥ २५– १ ॥

परामृतं ब्रह्मरूपं तपोरूपं जगच्च यत्
गुहाहितं यच्च दिव्यं तद्यो वेद स मुक्तिभाक् ॥ २६ ॥

प्रणवं नु धनुः कृत्वा स्वात्मानं बाणरूपिणम् ।
लक्ष्यरूपं ब्रह्म कृत्वा तद्वेद्धव्यं सदा बुधैः ॥ २७ ॥

तस्मिन् सूर्यो न चन्द्रश्च विद्युतोऽग्निर्न भान्ति वै ।
ते च सूर्यादयः सर्वे तस्य भासा विभान्ति हि ॥ २८ ॥

पुरः पश्चाद्दक्षिणतः उत्तरोर्ध्वमधश्च तत् ।
ब्रह्मैव वर्तते यस्मात् तस्माद् ब्रह्ममयं जगत् ॥ २९ ॥

द्वौ पक्षिणौ सहितौ वृक्षमेकं
समानमासाद्य सुसस्वजाते ।
तयोरेकः फलभुक् तत्र चैकः
सदेक्षिता भोजयिता च तस्य ॥ ३० ॥

अनीशया शोचमानो मग्नो वृक्षेऽभिमानवान् ।
महिमानं स्वस्य जुष्टम् ईशं दृष्ट्वा सुखी भवेत् ॥ ३१ ॥

भूताधियोनिं पुरुषं स्वात्मानं भूतनायकम् ।
पश्यते रुक्मवर्णान्तं तस्य साम्यमुपैति सः ॥ ३२ ॥

एष प्राणो विश्वरूपो विभाति
ज्ञात्वात्मानं भ (क ? वते) (नाभिमानी ? नातिवादी) ।

क्रीडारतिश्चात्मनि यस्य भाति
स एष विद्वान् विदुषां वरिष्ठः ॥ ३३ ॥

सत्येन ब्रह्मचर्येण ज्ञानेन तपसाप्ययम् ।
अन्तःशरीरे हृदये लभ्यो विक्षीणकल्मषः ॥ ३४ ॥

जयत्यवितथं नान्यत् सत्येनैव प्रकाशितः ।
देवयानश्च विततः ऋषयस्तदुपासते ॥ ३५ ॥

निधानं परमं तस्य यद् ब्रह्मेत्यभिधीयते ।
दिव्यमक्षररूपं च सूक्ष्मात् सूक्ष्मतरं च तत् ॥ ३६ ॥

न दूरैकान्तिके चैव विदुषामात्मरूपकम् ।
वाक्चक्षुर्दैवतपसामगम्यं तद्विदुर्बुधाः ॥ ३७ ॥

ज्ञानगम्यं सुसंवेद्यं विद्वद्भिर्ज्ञानतत्परैः ।
सूक्ष्मं तन्मनसा गम्यं प्राणायतनमीरितम् ॥ ३८ ॥
प्राणाच्चित्तं व्याप्य तिष्ठत् तस्मात्तेन प्रकाशते ॥ ३८–१ ॥

यं यं लोकं च कामं वा स्वात्मज्ञानी हृदा स्मरेत् ।
तं तं लोकं तं च कामं जयत्येव यतो जनः ॥ ३९ ॥

भूतिकामस्ततस्तस्य पूजां कुर्यादतन्द्रितः ।
आत्मज्ञपूजको ब्रह्म विश्वनीडं स वेद तत् ॥ ४० ॥

अकामाः पुरुषा ये तु ते तं ज्ञात्वा ह्युपासते ।
कामयानो यस्तु कामांस्तत्र तत्र स जायते ॥ ४१ ॥

आत्मकामस्य धीरस्य सर्वे हृदि लयं ययुः ।
मेधाप्रवचनाद्याश्च नात्मज्ञानाय साधनम् ॥ ४२ ॥

यो यं संवृणुते तेन लभ्यः स्वात्मानमादिशत् ।
बलाप्रमादसुतपःप्रभृति ब्रह्मकारिणम् ॥ ४३ ॥

तस्मादेतैरुपायैर्यो यतते स हि वेद तत् ।
एनं सम्प्राप्य ऋषयो वीतशोका विमुक्तिदाः ॥ ४४ ॥

सर्वगं सर्वतो व्याप्य सर्वमेव विशन्ति ते ।
सन्यासिनो वेदनिष्ठाः सुसूक्ष्मार्थविनिश्चयाः ।
इहैव मुक्ता देहान्ते ब्रह्ममात्राश्चरन्ति ते ॥ ४५ ॥

काला देवाः सप्रतिष्ठाश्च जीवाः
परे व्यये सर्व एकीभवन्ति ।
ये वेदैतत् परमं ब्रह्म धाम
स ब्रह्म तस्मान्न भवेदतज्ज्ञः ॥ ४६ ॥

शोकं तरति पाप्मानं गुहाग्रन्थिर्विनश्यति ।
स्वानन्दस्य परिस्फूर्तिः सदा तस्य भविष्यति ॥ ४७ ॥

इति श्रुत्वा शौनकस्तं गुरुमङ्गिरसं मुदा ।
नमस्कृत्य महर्षींश्च नित्यमुक्तश्चचार ह ॥ ४८ ॥

इति श्रीबोधानन्दगीतायां मुण्डकोपनिषद्रहस्यकथनं नाम
पञ्चमोऽध्यायः ॥

षष्ठोऽध्यायः

माण्डूक्योपनिषद्गूढपराभूमिवरासनम् ।
प्रतियोगिविनिर्मुक्तं तुर्यं यत्तदहं भजे ॥ १ ॥

ओङ्कारगम्यं यद् ब्रह्म भूतभव्यात्मकं जगत् ।
तत्कालत्रितयातीतं सोयमात्मा चतुष्पदः ॥ २ ॥

जाग्रत्स्थितो बहिःप्राज्ञो द्युमूर्धा द्व्यङ्गपत्तकः ।
एकोनविंशतिमुखः स्थूलभोक्ता विराड्हि सः ॥ ३ ॥

ब्रह्मणः प्रथमः पादो विश्व इत्युच्यते बुधैः ।
अन्तःप्रज्ञः स्वप्नसंस्थो वासनाङ्गादिसंयुतः ॥ ४ ॥

द्वितीयो ब्रह्मणः पादस्तैजसः प्रविविक्तभुक् ।
चेतोमुखः सुषुप्तिस्थः प्राज्ञः स्वानन्दभुक् तथा ॥ ५ ॥

तृतीयो ब्रह्मणः पादः घनप्रज्ञ इहोच्यते ।
एष सर्वेश्वरस्त्वेष भूताधिपतिरुच्यते ॥ ६ ॥

अन्तर्याम्ययमेवैषां सर्वेषां प्रभवात्ययः ।
दक्षिणाक्षिस्थितो विश्वो मनस्यन्तर्हि तैजसः ॥ ७ ॥

हृद्याकाशे तथा प्राज्ञो देहस्थानत्रयं विदुः ।
भोक्ता भोगश्च भोज्यं यत्कालत्रयसुसंस्थितम् ॥ ८ ॥

विविच्य वेद यो विद्वान् भुञ्जानः स न लिप्यते ।
सर्वे भावा सन्त एव तेषां जनिरिति स्थितिः ॥ ९ ॥

प्राणं विभूतिं कालं च भोगमिच्छां स्वभावकम् ।
सृष्टिहेतून् वदन्त्यन्ये विवर्तः श्रुतिनिर्णयः ॥ १० ॥

न विश्वस्तैजसः प्राज्ञः नाविद्या नैव मायिकः ।
न माया नैव साक्षी स न दृश्यो ग्राह्य एव च ॥ ११ ॥

अचिन्त्योऽव्यपदेश्यश्च प्रत्यगेकरसः श्रुतः ।
प्रपञ्चोपशमः शान्तश्चतुर्थः शिव उच्यते ॥ १२ ॥

सर्वदुःखादिरहितः प्रभुरव्यय ईश्वरः ।
दिवो द्वैतस्तुर्यरूपो वेदोऽयं प्रकृतेः परः ॥ १३ ॥

विश्वश्च तेजसश्चोभौ कार्यकारणबन्धकौ ।
प्राज्ञः कारणबन्धस्तु सोऽपि तुर्येण चेष्यते ॥ १४ ॥

द्वैतविस्मरणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।
बीजनिद्रायितः प्राज्ञः स च तुर्ये न विद्यते ॥ १५ ॥

अनाद्यविद्यया सुप्तो यो हि जीवः प्रबुध्यते ।
अनिद्रमस्वप्नमजं स्वात्मानं बुध्यते तदा ॥ १६ ॥

विद्यमानः प्रपञ्चोऽपि निवर्तेत न संशयः ।
द्वैतं मायामयं यस्मादद्वैतं निश्चितं भवेत् ॥ १७ ॥

गुरुशिष्यादयो भेदाः उपदेशाय तेऽभवन् ।
ज्ञाते तत्त्वे निवर्तन्ते रज्जुसर्पादयो यथा ॥ १८ ॥

यथा चोङ्कार एवात्मा मात्रापादास्तथा स्मृताः ।
अकारो विश्व इत्याहुराप्तेरादित्वहेतुतः ॥ १९ ॥

उकारस्तैजसः प्रोक्तः उत्कर्षाच्चोभयत्वतः ।
मकारः प्राज्ञ इत्याहुरपि ते मानवत्त्वतः ॥ २० ॥

स्थानत्रयवतां तेषां मात्रैः सह समानताम् ।
वेत्ति यस्तत्त्वतो लोके स पूज्यः सर्वतो जनैः ॥ २१ ॥

चतुर्थो मात्रश्च ग्राह्यः प्रपञ्चोपशमः शिवः ।
तदोंकारगम्यं स्वं ज्ञात्वा स एव भवति स्वयम् ॥ २२ ॥

पादशः प्रविभज्यादौ जीवत्रयमुपासते ।
ओङ्काररूपिणं पश्चात् स्वमात्मानमुपासते ॥ २३ ॥

त एव धन्या लोकेऽस्मिन् नान्ये पामरजन्तवः ।
मुमुक्षूणां त एवात्र ज्ञानदा मुक्तिदा अपि ॥ २४ ॥

अब्रह्मवित् सुतस्तेषां कुले नैव प्रजायते ।
स्थानत्रयविचारेण तुरीयार्थप्रकाशिनी ॥ २५ ॥

माण्डूक्योपनिषत्प्राह यत्तदस्मिन्न संशयः ।

इति श्रीबोधानन्दगीतायां माण्डूक्योपनिषदर्थप्रकाशनं नाम
षष्ठोऽध्यायः ॥

———

सप्तमोऽध्यायः

कोशानां पञ्चकं यच्च यात्यपह्नवमञ्जसा ।
सत्यज्ञानानन्दसुखं तदहं कलयेऽक्षरम् ॥ १ ॥

ब्रह्मवित्परमाप्नोति ब्रह्म सत्यादिलक्षणम् ।
वदे बुद्धौ स्थितो यस्तु सोऽश्नुते निखिलं सुखम् ॥ २ ॥

प्रत्यक्चितिस्वरूपेण यौगपद्येन लोकजम् ।
तस्मादात्मन आकाशः संभूतो हि ततोऽनिलः ॥ ३ ॥

ततोनलस्ततस्त्वापस्ताभ्यश्चाभूद्वसुन्धरा ।
तत ओषधयो रेतस्तद्वै पुरुष ईरितः ॥ ४ ॥

शिरोबाहूमध्यशेफौ शिरःपक्षात्मपुच्छकाः ।
प्रजाः सर्वा प्रजायन्ते ह्यन्नादन्नेन वर्धिताः ॥ ५ ॥

जीवन्त्यन्नेनापि यान्ति तस्मादन्नमयं जगत् ।
सर्वौषधं च ज्येष्ठ च तस्माद् ब्रह्म तदुच्यते ॥ ६ ॥

तस्मादन्नः प्राणमयः शिरः प्राणस्तु तस्य वै ।
व्यानो हि दक्षिणः पक्षोऽपान उत्तर ईरितः ॥ ७ ॥

आकाश आत्मा पृथिवी पुच्छमित्यभिधीयते ।
देवाः मनुष्याः पशवः तिर्यगाद्याश्च सर्वशः ॥ ८ ॥

प्राणमाश्रित्य तिष्ठन्ति स वायुः प्राण उच्यते ।
ज्येष्ठश्च पूर्वभूतानां सर्वं व्याप्यावतिष्ठति ॥ ९ ॥

प्राणिनः प्राणिनोऽभूवन्न प्राणी किं करिष्यति ।
अतः सर्वायुषः प्राणः स आत्मेति बुधा विदुः ॥ १० ॥

तस्मात्प्राणमयादन्यो मनोमय इति श्रुतः ।
मनस्वतिप्राणिनां हि जनिवृद्धिलयाः श्रुताः ॥ ११ ॥

यजुश्शिरो दक्षिणस्तु पक्षो ऋग्वेद ईरितः ।
सामोत्तरस्तु पक्षः स्यादात्मा देश इतीरिताः ॥ १२ ॥

अथर्वभिश्चाङ्गिरोभिर्दृष्टं पुच्छमितीरितम् ।
तस्यैष आत्मा शारीरः पूर्वयोर्यः समीरितः ॥ १३ ॥

वाङ्मनोऽगोचरं ब्रह्म निर्भयं सुखमात्रकः ।
विदित्वा न बिभेत्यस्माल्लोकाच्चामुष्मिकादपि ॥ १४ ॥

तस्मान्मनोमयादन्यो विज्ञानमय उच्यते ।
सोऽपि पूर्वान् समं व्याप्य स्थितः पुरुषरूपतः ॥ १५ ॥

तस्य श्रद्धा शिरः कर्मफलं दक्षिणो दृष्ट उत्तरः ।
तेजः पुच्छं हि कर्मात्मा विज्ञानं यज्ञकर्तृकम् ॥ १६ ॥

कर्तृत्वं कर्मणां तस्य मन आदीन्युपासते ।
ब्रह्म ज्येष्ठं च विज्ञानं तेन जातमिदं जगत् ॥ १७ ॥

विज्ञानं ब्रह्म विज्ञाय न प्रमादी सुखं लभेत् ।
य आत्मा पूर्वकोशानां स विश्वोऽत्र हि तैजसः ॥ १८ ॥

तेन व्याप्तमिदं सर्वं जगत्स्थावरजङ्गमम् ।
तस्माद्विज्ञानमयत आनन्दोऽन्यः समीरितः ॥ १९ ॥

तेन व्याप्ताः पूर्वकोशाः तस्य शीर्षं प्रियं विदुः ।
तस्मात्सञ्जातहर्षस्तु दक्षिणः पक्ष उच्यते ॥ २० ॥

तदावेशस्तूत्तरः स्यादात्मा तत्पारवश्यता ।
अस्याधिष्ठानमात्मानं पुच्छमाहुर्मनीषिणः ॥ २१ ॥

असद् ब्रह्मेति यो वेद सोऽसत्स्यान्नात्र संशयः ।
अस्ति ब्रह्मेति यो वेद ततः सन्तं विदुर्बुधाः ॥ २२ ॥

अविद्वान् वा सुविद्वान् वा प्रेत्यामुं लोकमश्नुते ।
विद्वानेव तथाऽविद्वानश्नोति परमं पदम् ॥ २३ ॥

प्रश्नाभिप्रायविज्ञानाच्छ्रुतिराह सनातनी ।
तच्छब्दलक्ष्यः पूर्णात्मा बहुः स्यामित्यमन्यत ॥ २४ ॥

तत आलोच्य तत्सर्वं यत्किञ्चिदसृजज्जगत् ।
सृष्ट्वा प्रविश्य तत्सर्वं स्वयमेवाभवत्प्रभुः ॥ २५ ॥

सन्निरुक्तं निलयनं विज्ञानं चेतनात्मकम् ।
अदनिर्दिष्टमस्थानमविज्ञानं जडात्मकम् ॥ २६ ॥

उभयस्यात्ममातृत्वात् तस्मात् सत्यं प्रचक्षते ।
इदं पुरानभिव्यक्तनामरूपात्मकं जगत् ॥ २७ ॥

व्यक्तं सन्नामरूपाभ्यां कृतं तत्सुकृतं स्मृतम् ।
सरसः सर्वभूतानि चालयन् सुखरूपतः ॥ २८ ॥

यद्याकाशो रसो न स्यात् कोऽन्यात् को वा विचेष्टयेत् ।
आनन्दयेत् तानि को वा पदे तस्मिंल्लयं व्रजेत् ॥ २९ ॥

प्रतिष्ठामथ यं विन्देद् भिन्दां तस्मिन् यदा स्मरेत् ।
अनभिज्ञस्य तत् ब्रह्म तदैव भयदं श्रुतम् ॥ ३० ॥

तद्भयाद्धै वाति वायुः सूर्याग्नीन्दुमुखाः सुराः ।
प्रवर्तन्ते स्वस्वकार्ये प्रेरिता इव सर्वदा ॥ ३१ ॥

आनन्दरूपनिर्दिष्टं ब्रह्म यत्तद्विविच्यते ।
सर्वैर्मानुष्यकैर्भोगैः सम्पन्नः साधुसम्मतः ॥ ३२ ॥

युवा बलिष्ठः सम्राट् च न नरानन्दो हि तत्सुखम् ।
गन्धर्वाणां शतं तेषामेकानन्द इतीर्यते ॥ ३३ ॥

तच्छतं चिरलोकानां पितृणामेक उच्यते ।
तच्छतं कर्मदेवानां देवानां चापि तच्छतम् ॥ ३४ ॥

इन्द्रस्य तच्छतं प्रोक्तं तच्छतं तु बृहस्पतेः ।
श्रोत्रियो वृजिनो कामहतो यो ब्रह्मवित्तमः ॥ ३५ ॥

पूर्वोक्ता ह्यखिलानन्दास्तस्य स्युर्नात्र संशयः ।
ब्रह्मानन्दस्तु योऽनन्तः सोऽपि तस्यैव सम्मतः ॥ ३६ ॥

इत्यानन्दस्य मीमांसां कृत्वा तस्याप्तये बुधाः ।
पूर्वोक्तानखिलान् कोशान् सङ्क्रम्यासि स्वकोशतः ॥ ३७ ॥

उद्धरेदात्मनात्मानमुद्धृतः स्वङ्गवत्स्वयम् ।
स्वतेजसा भासमानः स्वात्मारामो विराजते ॥ ३८ ॥

अतो ज्ञानी सदा मुक्तो बद्धो नास्त्येव तद्धिया ।
अविद्यया बद्धमुक्तौ कल्पितौ न हि संशयः ॥ ३९ ॥

इति श्रीबोधानन्दगीतायां
सप्तमोऽध्यायः ॥

अष्टमोऽध्यायः

अस्मिन्नर्थे पुरा प्रोक्त इतिहास इहोच्यते ।
भृगुर्वै वारुणिः पूर्वं पितरं त्विदमब्रवीत् ॥ १ ॥

अधीहि भगवो ब्रह्म इत्युक्तः प्राह तं पिता ।
विजिज्ञासस्व तपसा तपो ब्रह्म यतः श्रुतम् ॥ २ ॥

अन्नादीन् पञ्चकोशांस्त्वं क्रमेण सुविचारय ।
तपोविचारः सत्संगः ब्रह्मणः पदसूचकः ॥ ३ ॥

यस्मादिदं जगज्जातं येन जातं च जीवति ।
यस्मिंल्लयं प्रयातीदं तद् ब्रह्मेत्यवधारय ॥ ४ ॥

एवमुक्तस्तु स भृगुस्तपस्तप्त्वा सुदुश्चरम् ।
युक्त्या विचारयामास जगत्कारणमादितः ॥ ५ ॥

अन्नं ब्रह्मेति सञ्जानन् युक्तिं तत्र न्ययोजयत् ।
अन्नाद् भूतानि जायन्ते वृद्धिं प्राप्नोति तेन हि ॥ ६ ॥

तद्विहीनानि नश्यन्ति तस्माद् ब्रह्म तदेव हि ।
इति ज्ञात्वापि सन्तुष्टिर्नैव जायेत तस्य वै ॥ ७ ॥

पुनश्च पितरं प्राप्य पूर्ववत्प्राह वै भृगुः ।
सोऽपि प्राग्वत्सुतं प्राह तपसा च विचारतः ॥ ८ ॥

विजिज्ञासस्व ब्रह्मेत्युक्तः सोऽपि तथाकरोत् ।
तपस्तप्त्वा विचार्याथ प्राणो ब्रह्मेत्यवेदयत् ॥ ९ ॥

प्राणाज्जाताः प्रजाः सर्वाः प्रवृद्धास्तेन तत्र वै ।
प्राप्नुवन्ति लयं सर्वास्तेन प्राणस्तदुच्यते ॥ १० ॥

इति ज्ञात्वाप्यसन्तुष्टः पितरं प्रययौ पुनः ।
तेन पूर्ववदेवोक्तस्तपस्तप्त्वा विचार्य च ॥ ११ ॥

अन्नप्राणौ जडौ ह्यात्मा प्रज्ञानैकस्वरूपवान् ।
अतो नैतौ ब्रह्मरूपौ मनो ब्रह्म भवेदिह ॥ १२ ॥

मनसो हि वशे सर्वं मनसो जायते जगत् ।
वर्धते तच्च मनसा लयं प्राप्नोति तत्र वै ॥ १३ ॥

अतो मनो ब्रह्मरूपमिति निश्चित्य सादरम् ।
तथाप्यसन्तुष्टमनाः पितरं प्रययौ पुनः ॥ १४ ॥

सोऽपि पूर्ववदेवाह भृगुस्तप्त्वा विचार्य च ।
संशयादिमनस्तच्च विज्ञानाज्जनिमश्नुते ॥ १५ ॥

लीयते च पुनस्तत्र तदधीनं मनो यतः ।
मन आदि जगत्सर्वं ततो विज्ञानबीजकम् ॥ १६ ॥

विज्ञानमेव ब्रह्मेति ज्ञात्वा सन्तुष्टमानसः ।
पितरं प्रार्थ्य भूयोऽपि तपस्तप्त्वा विचार्य च ॥ १७ ॥

इदमित्थमिति ज्ञानं विज्ञानं प्रोच्यते बुधैः ।
श्रुतियुक्त्यनुभूतिभ्यः तस्य जन्म सुखाद्यतः ॥ १८ ॥

आनन्दवासनाजातं विज्ञानं मन आदिकम् ।
लीयते च पुनस्तत्र तस्माद् ब्रह्म सुखं श्रुतम् ॥ १९ ॥

आनन्दाद्वै जगज्जातं आनन्दार्थे विवर्धितम् ।
लीनमानन्द एवातो ब्रह्मानन्द इति श्रुतम् ॥ २० ॥

आनन्दपरमाकाशात्रभिन्नाविति बुद्धितः ।
निश्चित्य भृगुरन्नादिकोशान् सङ्क्रम्य वीर्यतः ॥ २१ ॥

कामान्ती कामरूपी सन् साम गायंश्चचार सः ।
अहमन्नं सदान्नादो वेदकृज्जगतः स्थितिः ॥ २२ ॥

देवेभ्यः पूर्वमेवासमन्नादो देवरूपधृक्
मामदत्वा तु भुञ्जानमहमस्म्यन्नरूपधृक् ॥ २३ ॥

आदित्य इति सुज्योतिः स्वप्रकाशोऽहमास्थितः ।
व्यावहारिकदृष्ट्येदं मम रूपं श्रुतिर्जगौ ॥ २४ ॥

पारमार्थिकविज्ञानं न विरोधश्रुतिर्जगौ ।
अनिरूपितरूपोऽयमाकाशोऽहं न संशयः ॥ २५ ॥

भयहेतोर्द्वितीयस्य अभावादभयोस्म्यहम् ।
निवृत्तेः सर्वदुःखानां सुखरूपी सदास्म्यहम् ॥ २६ ॥

इति गायन् भृगुस्तस्मात्सन्तुष्टो विचचार ह ॥

इति बोधानन्दगीतायाम्
अष्टमोऽध्यायः ॥

———

नवमोऽध्यायः

कर्मज्ञानमयी दृष्टिर्यत् प्रज्ञाने समाप्यते ।
तत्प्रज्ञानं परं ब्रह्म स्वमात्रं न स्वतः पृथक् ॥ १ ॥

ओम्—इदमासीत् पूर्वमात्मा तस्मादन्यन्मृषा भवेत् ।
स ऐच्छन्नु सृजा लोका सेच्छाव्यक्तस्तथा मरुत् ॥ २ ॥

तेनोपहित आत्मा स सृष्टवान् निखिलं जगत् ।
अम्भोदिवं ह्यन्तरिदं पृथिवीं जलमन्ततः ॥ ३ ॥

सृष्ट्वैच्छल्लोकपालान्नु सृजेयमिति शंकरः ।
सोऽद्भ्य एव हि पुरुषमुत्पाद्याभ्यतपच्च तम् ॥ ४ ॥

तस्याभितप्तस्य मुखं यथाण्डं निरभिद्यत ।
मुखाद्वाक् च ततोऽग्निश्च भिद्येतामथ नासिके ॥ ५ ॥

ताभ्यां प्राणस्ततो वायुरभिद्येतां हि चक्षुषी ।
ताभ्यां चक्षुस्ततः सूर्यश्चाभिद्येतां श्रुती यदा ॥ ६ ॥

ताभ्यां कर्णौ ततस्त्वाशास्त्वगभिद्यत तस्य हि ।
ततो लोमानि तेभ्योऽपि वृक्षा ओषधयोऽभवन् ॥ ७ ॥

हृदो मनस्ततश्चन्द्रोऽपानो नाभेस्ततोऽन्तकः ।
शिश्नाद्रेतस्ततस्त्वापस्ते देवा लोकसागरे ॥ ८ ॥

तपन्तः पुरुषं प्राहुः क्षुत्तृड्भ्यां परिपीडितः ।
यस्मिन् स्थित्वा च भुञ्जानान्नं वृद्धिं प्राप्स्यामहे वयम् ॥ ९ ॥

तदायतनमस्माकं ब्रूहि सर्वेश्वर प्रभो ।
इत्युक्तः सोऽपि सर्वेको (?) गामश्वादिमानयत् ॥ १० ॥

तदृष्ट्वा चाब्रुवंस्तांस्तं नालं नोऽयं हि तृप्तये ।
इत्युक्तः पौरुषं देहं सुखायतनमुत्तमम् ॥ ११ ॥

प्रविश्यैनं हि मोदध्वमिति ता अब्रवीच्च सः ।
अथाग्निर्वाचमाविश्य मुखं प्राप्य सुखं स्थितः ॥ १२ ॥

वायुर्भूत्वा प्राणसंज्ञो नासिके प्राविशत् स्वयम् ।
चक्षुर्भूत्वा तथादित्यश्चक्षुषी व्याप्य तिष्ठति ॥ १३ ॥

दिशो भूत्वा ततः श्रोत्रं कर्णौ संव्याप्य संस्थितः ।
वृक्षाश्चोषधयो लोमान्याविश्य त्वचमास्थिताः ॥ १४ ॥

चन्द्रमा हि मनो भूत्वा हृदयं प्राविशत् सुखम् ।
भूत्वापानो मृत्युरस्मिन् नाभिं प्राविशदादरात् ॥ १५ ॥

भूत्वाऽपो रेतसो रूपं प्राविशच्छिश्नमप्यथ ।
तमब्रूतां क्षुत्पिपासे आवयोः कुत्र संस्थितिः ॥ १६ ॥

इति ते तासु भागिन्यावकरोत्परमेश्वरः ।
तस्माद् यस्यै देवतायै गृह्यते हविरध्वरे ॥ १७ ॥

भगिन्यौ तत्र ते भूत्वा भुक्तान्नं तृप्तिमाप्नुतः ।
सृष्ट्वा लोकान् लोकपालानथैच्छत्परमेश्वरः ॥ १८ ॥

सृष्ट्वा लोकाः लोकपाला अन्नमेभ्यः सृजा इति ।
अपः सोऽभ्यतपत्तत्र तेषामन्नमजायत ॥ १९ ॥

वाक्प्राणश्चक्षुःश्रोत्रं स्वङ्मनश्शिश्नैर्हि भक्षितुम् ।
अशक्तास्ता अपानेन भुक्त्वा तृप्तिं समाययुः ॥ २० ॥

अथैच्छदात्मा तान् दृष्ट्वा निश्चेष्टान् सहते कथम् ।
विचेष्टन्ते कथन्त्वेते तेष्वहं प्रविशाम्यतः ॥ २१ ॥

कतरेण हि मार्गेण प्रविशामीत्यमन्यत ।
वागादिमार्गसञ्चारे वायोर्हि विनियोजिताः ॥ २२ ॥

इति हित्वा हि तान् सर्वान् विदित्वा प्राविशत् स्वयम् ।
तत्प्रवेशवशाज्जीवस्तस्य स्थानत्रयं स्मृतम् ॥ २३ ॥

जाग्रत्स्वप्नसुषुप्त्याख्यं स्वप्नतुल्यं विदुर्बुधाः ।
तस्य दृश्यमिदं यस्मादिन्द्रो नाम तं बुधाः ॥ २४ ॥

परोक्षेणेन्द्र इत्याहुः स परोक्षप्रियो यतः ।
प्रत्यक्षप्रेषिणो देवास्ते परोक्षप्रिया इव ॥ २५ ॥

कालत्रयविहारी सन् स इन्द्रो देहवानिव ।
कर्मकर्तेव भोक्तेव तिष्ठत्यज्ञ इवेश्वरः ॥ २६ ॥

इति श्रीबोधानन्दगीतायाम्
नवमोऽध्यायः ।

———

दशमोऽध्यायः

अयमिन्द्रः कर्म कृत्वा तत्फलं चानुभूय सः ।
वृष्टितो भुवमाविश्य यथाकर्मानुसारतः ॥ १ ॥

जन्म लब्ध्वौषधीनां च प्रविश्य पुरुषोदरम् ।
मासद्वयमुषित्वाथ स्त्रीयोनौ प्राविशत् स्वयम् ॥ २ ॥

तदस्य प्रथमं जन्म तं भावयति साग्रतः ।
सोऽपि तस्या आत्मभूतो न तस्यैनां हिनस्ति वै ॥ ३ ॥

सो हि पूज्यतमो तस्मान्मातृदेव श्रुतेरपि ।
तस्यापि निर्गतो तर्हि द्वितीयं जन्म तस्य वै ॥ ४ ॥

श्रौतस्मार्तेषु कृत्येषु स वै प्रतिनिधिः पितुः ।
पिता तस्य वयोहानौ मृत्वा जायेत यत्पुनः ॥ ५ ॥

तृतीयं जन्म तस्येदमिति वेदेषु निर्णयः ।
वामदेवादयो गर्भे वसन्तो जगुरास्तिकाः ॥ ६ ॥

अहं मनुस्त्वहं सूर्यो देवानां पतिरप्यहम् ।
ते हि विज्ञानिनः प्रोक्तास्तेषां जन्म न विद्यते ॥ ७ ॥

ये त्वन्ये रागिणो लोके ते पूर्वकृतमादरात् ।
स्मरन्तो दुःखिताश्चैव जाताः कर्माणि कुर्वते ॥ ८ ॥

ते तु तत्फलभोगार्थं मृत्वा लोकान्तराणि च ।
गत्वा भुक्त्वा कर्मफलं पुनर्भूमौ विशन्ति च ॥ ९ ॥

पुनर्जन्म लभन्ते ते तेषां क्वापि न निर्वृतिः ।
आत्मज्ञानादृते तस्मात् प्राक् देहस्य विमोक्षणात् ॥ १० ॥

उपसर्प्य गुरुं प्राज्ञं तस्माल्लब्धप्रबोधवान् ।
साधनैः संयुतो भूत्वा गुरूक्तमखिलं स्वयम् ॥ ११ ॥

मननेन विनिश्चित्य निदिध्यासनतः सुधीः ।
साक्षात्कृत्य स्वमात्मानं परमाकाशरूपिणम् ॥ १२ ॥

सन्तुष्टहृदयो भूत्वा यश्चरेद्वायुबालवत् ।
स एव धन्यो मुक्तः स्यादिति वेदानुशासनम् ॥ १३ ॥

इति श्रुत्वा महात्मानः सर्वसाधनसंयुताः ।
पप्रच्छुर्वेदपुरुषं वयं कं समुपास्महे ॥ १४ ॥

उपास्यभूतः को वात्मा तमस्माकं ब्रवीषि भोः ।
इति पृष्टः स तानाह दर्शनश्रवणादिषु ॥ १५ ॥

प्रेरकं यद्धि विज्ञानं तद् ब्रह्मेन्द्रनरादिषु ।
एकं चैतन्यमित्युक्तं तदुपास्यं मुमुक्षुभिः ॥ १६ ॥

बुद्धिर्मनश्च संज्ञानमज्ञानं ज्ञप्तिरेव च ।
मेधा दृष्टिर्धृतिर्जूतिः क्रतुः कामो वशोऽप्यसुः ॥ १७ ॥

प्रज्ञाननामधेयानि वदन्ति श्रुतयो यतः ।
तस्मादिन्द्रश्च ब्रह्मा च देवाश्चैव प्रजापतिः ॥ १८ ॥

पृथिव्यादीनि भूतानि भूतग्रामचतुष्टयम् ।
प्रज्ञाने संस्थितं सर्वं नातिरिक्तं ततोऽभवत् ॥ १९ ॥

चिद् यूयं चिदहं ते च चितो लोका यतः श्रुताः ।
तस्माद् भवन्तः स्वात्मानं प्रज्ञात्मानं विजानथ ॥ २० ॥

विमुञ्चथान्यभात्रं तमुपास्यं वित्तसाधनम् ।

अतो भवन्तः श्रितसाधनं हि
प्रज्ञानचैतन्यमुपास्य पूर्वं ।
ईशादिसर्वोपनिषद्रहस्यं
खं ब्रह्मपूर्णं परमं भजध्वम् ॥ २१ ॥

इति श्रीबोधानन्दगीतायाम् ऐतरेयोपनिषद्रहस्यं नाम
दशमोऽध्यायः ॥

एकादशोऽध्यायः

आरुणेयः श्वेतकेतुर्बालचेष्टापरोऽभवत् ।
पिता तं प्राह तु भवान् ब्रह्मचर्यं वसत्विति ॥ १ ॥

पितुर्वाक्यं समाकर्ण्य श्वेतकेतुश्च गौतमम् ।
उपसर्प्य ततो वेदानधीत्य द्वादशाब्दकम् ॥ २ ॥

उषित्वा गौतमे तस्मादनुज्ञां प्राप्य हृष्टधीः ।
महामना अनूचानमानी स्तब्धो गृहं ययौ ॥ ३ ॥

तं दृष्ट्वा सविता प्राह किं त्वं स्तब्धोऽसि पुत्रक ।
त्वया श्रुतः स आदेशो येन सर्वं श्रुतं भवेत् ॥ ४ ॥

अश्रुतं चाप्यविज्ञानं विज्ञानं भवतीह तु ।
इति श्रुत्वा श्वेतकेतुः पितरं प्राह सादरम् ॥ ५ ॥

मयाश्रुतः स आदेशः स मे गुरुषु नास्ति हि ।
यद्यस्ति मह्यं ब्रूयुस्ते तस्य त्वं मे गुरुर्भव ॥ ६ ॥

यस्योपदेशतः सर्वं विदितं मे भवेदिह ।
तमादेशं सदृष्टान्तं स पिता प्राह सुतं प्रति ॥ ७ ॥

मृत्पिण्डे विदिते सौम्य विदिताः स्युर्घटादयः ।
यथा सुवर्णे विदिते विदिता मकुटादयः ॥ ८ ॥

यथा तन्तौ सुविदिते विदिताः स्युः पटादयः ।
सर्वत्र नामरूपादिविकारो वाग्विजृम्भितः ॥ ९ ॥

सत्यं मृदादयस्त्वेष आदेशस्तद्वदेव हि ।
तं ते ब्रवीमि सौम्य त्वं सावधानमनाः श्रुणु ॥ १० ॥

आसीत् सदेव सौम्येह सृष्टेः पूर्वमिदं जगद् ।
असदेवेदमित्याहुरपरे शून्यवादिनः ॥ ११ ॥

सृष्टेः पूर्वं परं नाशादसदेवोपलक्ष्यते ।
तस्मान्मध्ये जगदसदिति मन्यामहे वयम् ॥ १२ ॥

असतो हि कुमारस्य जन्म प्राहुर्मनीषिणः ।
अत्यसंगतमेवोचुः वृद्धा वै शून्यवादिनः ॥ १३ ॥

असतो हेतुता दृष्टा न कार्यं प्रति सर्वथा ।
तर्हि वन्ध्यासुतोऽपीह कार्यनिर्वाहको भवेत् ॥ १४ ॥

शशशृङ्गोऽपि वज्रः स्यात् खपुष्पाण्यपि मालिका ।
वन्ध्यासुतस्य हेतुत्वं शशशृङ्गस्य वज्रता ॥ १५ ॥

खपुष्पाणां च मालात्वं नैव दृष्टं यतस्ततः ।
असद्वादो हि निर्मूलः परित्यक्तश्च सूरिभिः ॥ १६ ॥

साक्ष्याभावे कथं सिध्येच्छून्यवक्ता वृको भवेत् ।
यद्यस्ति साक्षितच्छून्यवादः सार्थः कथं भवेत् ॥ १७ ॥

वेदबाह्योह्यसद्वादा उपेक्ष्या वेदसम्मतैः ।
असद्वादो जल्पमात्रो युक्तिमूलविवर्जितः ॥ १८ ॥

तस्माद् सर्वमिदं पूर्वं सृष्टेः पश्चाच्च नाशतः ।
आसीत् सन्नामरूपाभ्यामनभिव्यक्तचेतनम् ॥ १९ ॥

सृष्टिकाले नामरूपैरभिव्यक्तमिदं जगत् ।
तच्चेतनं त्वेकमेव सजातीयादिभिस्त्रिभिः ॥ २० ॥

भेदैर्विवर्जितं तच्च बहुस्यामित्यपेक्षत ।
स्वस्वरूपं पुराकाशं वायुमिच्छास्वरूपिणम् ॥ २१ ॥

सृष्ट्वा स वायुना तेजः क्रियातोऽस्य जनिस्ततः ।
तेनापः समसृजत्तस्मात्तापेनापां जनिस्ततः ॥ २२ ॥

अद्भिरन्नं समसृजत्तेनान्नं वर्षसंभवम् ।
सद्रूपं ब्रह्मसृष्टयर्थमैच्छद्वायुर्हि सोऽभवत् ॥ २३ ॥

स प्राणसंज्ञः स्थूलेन सूक्ष्मात् कूटस्थतां गतः ।
प्रविश्य दीपसंज्ञः स लोकसृष्टयर्थमादरात् ॥ २४ ।

स कालकर्मपाकेन सृष्टयास्थावान् स हीश्वरः ।
स्थूलाद् भूतत्रयं सृष्ट्वा सूक्ष्मादीशादिकं त्रिकम् ॥ २५ ॥

असृजत्कालपाकेन त्रीणि भूतानि हीश्वरः ।
प्रविश्य जीवसंज्ञः स लोकसृष्टयर्थमादरात् ॥ २६ ॥

त्रिवृच्चकार तेष्वेकं द्विधाकृत्वार्धमीश्वरः ।
द्विधाकृत्य तु चैकैकमेकैकस्मिन्नयोजयत् ॥ २७ ॥

एवं त्रिवृत्कृते भूतैः सृष्टवान् निखिलं जगत् ।
अग्न्यादित्यौ चन्द्रविद्युत्प्रमुखानमरांस्तरून् ॥ २८ ॥

तस्मात्ते रोहितं शुक्लं कृष्णं हित्वा न चाभवन् ।
यद्रोहितं तु दृश्येत तेजोरूपं नु तद्विदुः ॥ २९ ॥

यच्छुक्लं तदपां रूपं यत्कृष्णं पृथिवीमयम् ।
यद्यविज्ञातमिव च तत्समासं विदुर्बुधाः ॥ ३० ॥

यदन्नमशितं त्रेधा तत्कृत्वा स्थूलमागतः ।
पुरीषमसृजन्मध्यात्तस्य मांसं समासृजत् ॥ ३१ ॥

सूक्ष्मान्मनः समसृजच्चतुर्मूर्तिसमान्वितम् ।
आपः पीतास्त्रिधा कृत्वा स्थूलान्मूत्रं तु मध्यमात् ॥ ३२ ॥

लोहितादि जलांशं च सृष्टवान् परमेश्वरः ।
सूक्ष्मात्प्राणादिकान् वायून् ततस्ते जलमाश्रिताः ॥ ३३ ॥

तथा तेजोशिनं त्रेधा कृत्वा स्थूले न चास्थिकृत् ।
मध्यान्मज्जां तथा सूक्ष्माद्वागादीनीन्द्रियाण्यपि ॥ ३४ ॥

एवं देहान् समुत्पाद्य तत्र तत्र प्रविश्य च ।
नामरूपे तत्र तत्र कृत्वा ताभ्यां विमोहितः ॥ ३५ ॥

कर्म कुर्वन् सुखार्थं स तिष्ठत्यज्ञ इवेश्वरः ।
श्रुत्वैतच्छ्वेतकेतुस्तु पितरं प्राह सादरम् ॥ ३६ ॥

ब्रूहि निःसंशयं तात मनःप्राणादिकान् प्रति ।
इति पृष्टः पिता प्राह संशयच्छेदकं वचः ॥ ३७ ॥

सौम्य दध्नो मथ्यमानात् सूक्ष्मांशस्तु विनिर्गतः ।
नवनीताज्यरूपेण परिणामं व्रजेद् यथा ॥ ३८ ॥

तथान्नात्पच्यमानात्तत् सूक्ष्मांशो मन आभवत् ।
अद्भ्यः प्राणस्तेजसस्तदिन्द्रियाण्यपि सूक्ष्मतः ॥ ३९ ॥

अत्रापि संशयश्चेत्ते दिनानि दश पञ्च च ।
अनश्नन्नुदकं पीत्वा तिष्ठन्नागच्छ मामिति ॥ ४० ॥

पित्रोक्तः श्वेतकेतुश्च तथाकृत्वागतश्च तम् ।
तमागतं पिता प्राह यत्किञ्चिद् ब्रूहि सौम्य भो ॥ ४१ ॥

इत्युक्तः सोऽपि तं प्राह न वै किञ्चिद् विभाति मे ।
ततः पिता सुतं प्राह महतोऽभ्यहितस्य हि ॥ ४२ ॥

खद्योतमात्रो नाङ्गारः शिष्टस्ते न दहेद्बहून् ।
प्रज्वाल्य तं तृणैः सूक्ष्मैर्दहत्तेन बहून्यपि ॥ ४३ ॥

कलानां ते षोडशानां शिष्टा त्वेका कला तया ।
वक्तुं वेदान्न योग्यस्त्वं तामन्नेनेह वर्धय ॥ ४४ ॥

ततस्तासु कलाः पूर्णाः भविष्यन्ति ततो वदेत् ।
वेदाञ्छास्त्राणि चान्यानीत्युक्तः सोऽपि तथाकरोत् ॥ ४५ ॥

वक्तुं हि वेदानन्यांश्च स समर्थस्तदाऽभवत् ।
तं पितापि पुनः प्राह दृष्टं सौम्य मनस्त्वया ॥ ४६ ॥

भुक्तान्नं वेत्ति सर्वम् अन्नाभावेन वेद च ।
जलं तेऽपिबतः प्राणाः न विच्छिन्ना यतस्ततः ॥ ४७ ॥

अन्नमयं सौम्य मनः प्राणा जलमयाः श्रुताः ।
तेजोमयानीन्द्रियाणि विद्धि मा कुरु संशयम् ॥ ४८ ॥

यदायं पुरुषः सौम्य जाग्रत्स्वप्नौ विहाय च ।
सुषुप्तिमनुभूयेत स्वमपीतो भवत्तदा ॥ ४९ ॥

मनः शकुनिवत्तत्र प्राणबन्धनमाश्रितम् ।
स्वपितीति वदन्तीमं तदज्ञानविमोहिताः ॥ ५० ॥

यदायमन्नमश्नाति नयन्त्यापोऽग्निरेव ताः
नयेत्तं सच्च सन्मूला सौम्य सर्वा प्रजा इमाः ॥ ५१ ॥

शोनाय इत्यश्नायस्त्वशनायेति चेशितुः ।
मरिष्यतस्त्विन्द्रियाणि संपद्यन्ते मनस्यथ ॥ ५२ ॥

मनः प्राणे तेजसि च परस्यां तच्च संगतम् ।
परशब्दाभिधं ब्रह्म तदात्मकमिदं जगत् ॥ ५३ ॥

तदेव त्वं तदेवाहमिति विद्धीत्युपादिशत्
इत्याकर्ण्य स भूयो मे ब्रवीत्वत्र भवानिति ॥ ५४ ॥

तथेत्याह पिता पुत्रमुपदिष्टार्थसिद्धये ।
फलानां विविधानां त्वं रसानाहृत्य चैकतः ॥ ५५ ॥

संक्षिप्य पीत्वा तद्भेदं न जानाति यथा तथा ।
सति सम्पद्य न विदुः प्राणिनो भेदमात्मनः ॥ ५६ ॥

व्याघ्रसिंहवृकाद्याश्च दंशाः कीटादयस्तथा ।
सतैकत्वं समासाद्य सन्त एव भवन्ति हि ॥ ५७ ॥

येन सूक्ष्मेण तत्सूक्ष्मं तत्त्वमेवास्य संशयम् ।
इति श्रुत्वा भूय एव ब्रवीत्विति सुतो जगौ ॥ ५८ ॥

तं पिता तु पुनः प्राह सौम्य वृक्षश्च मूलतः ।
हतो मध्येऽग्रतो वापि जीवन्नेव जलं स्रवेत् ॥ ५९ ॥

जीवेनायं प्रभूतो हि बहुशाखा प्रवालवान्
पेपीयमानो हि जलं मोदमानश्च तिष्ठति ॥ ६० ॥

यदा शाखा जहात्येकां जीवः सा शुष्यती स्वयम् ।
द्वितीयं च तृतीयं च सर्वं चेच्छुष्यति स्वयम् ॥ ६१ ॥

एवं व्याप्य स्थितो जीवो देहमापदमस्तकम् ।
यदैकावयवं जाड्यात्स निश्चेष्टां भवेद्ध्रुवम् ॥ ६२ ॥

सर्वान् क्रमेण हित्वा स नयनान्तःपरिस्फुरन् ।
सूक्ष्मरूपेण हित्वा तद् बहिर्गच्छन्निवाबभौ ॥ ६३ ॥

येनेदं व्याप्य सन्तिष्ठेत् तत् सूक्ष्मं ब्रह्म केवलम् ।
इति श्रुत्वा भूय एव ब्रवीत्विति सुतोऽब्रवीत् ॥ ६४ ॥

तं पिता प्राह पुत्र त्वं न्यग्रोधफलमाहर ।
सोऽप्याहरत् स तद् दृष्ट्वा भिन्धीत्याह सुतं प्रति ॥ ६५ ॥

भिन्नं भगवन्नित्युक्ते पश्यसि त्वं किमत्र वै ।
सूक्ष्माधान इति प्रोक्ते भिन्धैकान्ता सुपुत्रक ॥ ६६ ॥

भिन्नेति पुत्रेणोक्ते तु तत्र किं पश्य तिष्ठते ।
न किञ्चनेति तेनोक्ते श्रद्धस्वेति पिताब्रवीत् ॥ ६७ ॥

तस्मिन्नणिम्नि वृक्षोऽयं बहुशाखो व्यतिष्ठत ।

सति सकलदृश्यबोधे
न किमप्यस्तीति लोकसिद्धं चेत् ।

यन्न किमपीति सिद्धं
ब्रह्म तदेवेति तत्सिद्धम् ॥ ६८ ॥

यथा सूक्ष्मं बीजमस्य न्यग्रोधस्येह पश्यसि ।
जगतश्च तथा सूक्ष्मं विद्धि बीजं त्वमस्य हम् ॥ ६९ ॥

अस्मिन् लोकास्तदेवेति त्वं विज्ञाय सुखं चर ।
इति श्रुत्वा भूय एव वदस्वेत्यब्रवीत् सुतः ॥ ७० ॥

भूयः प्राह पिता पुत्रं प्रस्थमात्रं तु सैन्धवम् ।
प्रस्थमात्रे जले क्षिप्त्वा प्रातर्मामुपसीदथ ॥ ७१ ॥

तथा कृत्वा ससादाथ क्षिप्तं लवणमाहर ।
पित्रेत्युक्तः श्वेतकेतुर्लवणं तद्विमृश्य च ॥ ७२ ॥

अलब्ध्वा पितरं प्राह तद्धि लीनं न दृश्यते ।
आदावन्ते च मध्ये च किञ्चित् पीत्वा वदस्व किम् ॥ ७३ ॥

लवणं जलमित्येवं प्रोक्तः पित्रा तथाकरोत् ।
सर्वं लवणमेवेति प्रोक्तः पुत्रेण तं पिता ॥ ७४ ॥

प्रस्थमात्रमिते पात्रे क्षिप्त्वाग्नौ सम्प्रताप्य तत् ।
गृहीत्वा पुनरागच्छेत्युक्तः सोऽपि तथाकरोत् ॥ ७५ ॥

तच्छश्वद्वर्तते शुद्धं गृहीत्वा पितुरन्तिकम् ।
आगत्य लवणं शुद्धं सम्प्रदाय पुरः स्थितः ॥ ७६ ॥

तं वीक्ष्य प्राह स पिता हे पुत्रक त्वया इह ।
विलीय कारणे कार्यमेकरूपतया स्थितम् ॥ ७७ ॥

पुनः पाकविशेषेण कारणं कार्यमाभवत् ।
इदं जगद् ब्रह्मकार्यं ब्रह्मैवेतीह निश्चिनु ॥ ७८ ॥

सर्वस्य कारणं ब्रह्म सूक्ष्मतत्त्वं न संशयः ।
इति श्रुत्वा श्वेतकेतुः पितरं प्राह सादरम् ॥ ७९ ॥

भूय एव वदस्वेति तथेत्याह पिता च तम् ।
गान्धारदेशे राजानं गृहीत्वा शत्रवः पुरा ॥ ८० ॥

अतिदूरं निनायाथ पिनद्धाक्षं विधाय च ।
विसृज्य निर्जने रम्ये शत्रवस्ते पलायिताः ॥ ८१ ॥

प्राच्यादिदिग्विभागान् स न विवेदाक्षिबन्धनात् ।
स्थातुं गन्तुमशक्तः सन् वर्तते दिग्भ्रमाद्धि स ॥ ८२ ॥

एवं विभ्रमतस्तस्य काले पाकेन कश्चन ।
सुहृत्समेत्य तद्बन्धं विमुच्येदं तमब्रवीत् ॥ ८३ ॥

प्राची दिक्स्थो हि गान्धारस्तस्य मार्गस्त्वयं नृप ।
अनेनैव हि मार्गेण व्रज गान्धारमाप्नुहि ॥ ८४ ॥

इत्युक्तस्तेन मार्गेण ग्रामात् ग्राममतीत्य सः ।
गान्धारमगमत् राजा तथाज्ञानविमोहितः ॥ ८५ ॥

असत्यं सत्यमिति च ज्ञात्वा भ्रमति देहवान् ।
स्वस्वरूपानभिज्ञः सन् देहदारादिकेष्वहम् ॥ ८६ ॥

ममेति मन्यमानोऽसौ पतन् संसारकानने ।
स्थातुं गन्तुं कर्म कर्तुमशक्तः संशयावृतः ॥ ८७ ॥

तिष्ठत्येवं स एवेशो गुरुर्भूत्वा तदन्तिकम् ।
आगत्य करुणायत्तो निर्व्याजं पर्यबोधयत् ॥ ८८ ॥

इदं देहादिकं सर्वं नासि ते नास्ति किञ्चन ।
प्रज्ञानैकस्वरूपस्त्वं सर्वसाक्षी निरञ्जनः ॥ ८९ ॥

परमानन्दरूपस्त्वमतो भ्रान्तिं परित्यज ।
सर्वकामविनिर्मुक्तः पदं गच्छत्यनामयम् ॥ ९० ॥

इति संबोधितस्तेन वैराग्यादिसमन्वितः ।
तेनोपदिष्टमार्गेण स्वस्वरूपं व्रजेत् यतः ॥ ९१ ॥

येन सूक्ष्मोपदेशेन धन्यो देही विमुक्तिभाक् ।
तत्सूक्ष्मं त्वं महच्चेति बोधितः पुनरेव तम् ॥ ९२ ॥

भूयो ब्रूहीति पप्रच्छ तं पिता प्राह सादरम् ।
परिवार्यैव पप्रच्छुर्ज्ञातयस्तूपतापिनः ॥ ९३ ॥

मां किं जानासि हे तात जानासीमान् जनानिति ।
तैः पृष्टः सोऽपि जानामि युष्मानित्याह यावता ॥ ९४ ॥

बुद्धौ लीनानीन्द्रियाणि तच्च प्राणे स तेजसि ।
तत्परस्यां देवतायां न लीनस्तावदेव हि ॥ ९५ ॥

यदा लीनं न जानाति तज्ज्ञानं ब्रह्म केवलम् ।
ऐतदात्म्यमिदं सर्वं तत्सत्यं त्वं न संशयः ॥ ९६ ॥

इति संबोधितः पित्रा भूय इत्याह पूर्ववत् ।
पुत्रचोरमचोरं च दृष्ट्वा राजा विशुद्धये ॥ ९७ ॥

तयोस्तप्तं तु परशुं हस्तयोः क्षिपतेति च ।
आज्ञप्तवानिति श्रुत्वा चोरः सत्येन वर्मणा ॥ ९८ ॥

छादितस्तं गृहीत्वाथ न दग्धस्तेन पूजितः ।
विमुक्तश्चाथ चोरस्तु मिथ्यावर्मसमावृतः ॥ ९९ ॥

गृहीत्वा परशुं तप्तं दग्धस्तेन सुशिक्षितः ।
यत्सत्यं सत्यवद्धस्ते स्थित्वा वह्निं प्रशाम्य च ॥ १०० ॥

सुखं प्रादात् सुपूज्यत्वं तत् खं तत्त्वमहं च तत् ।
ऐतदात्म्यमिदं तत्त्वमसि सौम्य न संशयः ॥ १०१ ॥

छन्दोगस्तुतिमस्तकेन विहितं सत्यं परं ब्रह्म यत्
तच्छुद्धं सकलं तदात्मकमिदं तस्मान्न किञ्चित् परम् ।
ज्ञात्वेदं परमं विशुद्धमनसा शास्त्रैर्गुरोर्वाक्यतः
शान्त्याद्यैर्बहुभिः श्रुतैरवगतैर्युक्तः पुमान्मुच्यते ॥ १०२ ॥

इति श्रीमद्ब्रह्मानन्दयतीन्द्रशिष्यबोधानन्दविरचितबोधानन्दगीतायाँ छन्दोगश्रुत्यर्थप्रकाशनं नामैकादशोऽध्यायः ॥

द्वादशोऽध्यायः

छान्दोग्योपनिषद्गूढब्रह्मैवाहं न संशयः ।
इति बुद्धिर्भवेद्यस्य स मुक्तो नात्र संशयः ॥ १ ॥

पूर्णाध्यायार्थसंसिद्धं मध्यपूर्णं सुखात्मकम् ।
कलयेऽहं स्वात्ममात्रं परमाकाशरूपिणम् ॥ २ ॥

पूर्णमूर्ध्वमधःपूर्णं मध्यपूर्णं सुखात्मकम् ।
यत्किञ्चिद् दृश्यते सर्वं पूर्णादेव समुद्भमौ ॥ ३ ॥

तस्मात् पूर्णं सदा भाति चेतनाचेतनात्मकम् ।
तदेव परमाकाशः स्वेन रूपेण सूक्ष्मतः ॥ ४ ॥

पूर्णाध्यस्तं पूर्णलीनं तदा पूर्णं विशिष्यते ।
तस्मादाकाश एवात्मा वायुर्यत्र विचेष्टते ॥ ५ ॥

विलीयते च यत्रैव वायुः सोऽपि तद्धि (?) न ।
इत्यर्जुनः पुरा वेद केशवस्योपदेशतः ॥ ६ ॥

खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ।
आत्मानं खमयं कृत्वा न किञ्चिदपि चिन्तय ॥ ७ ॥

वेदोयं ब्राह्मणा यच्च वेदितव्यं विदुर्ह्यतः ।
उपासनार्थं विज्ञानं ब्रह्मेत्याह श्रुतिः पुरा ॥ ८ ॥

खं ब्रह्म वेदितव्यं हि विदित्वा सुसुखी भव ।
प्राजापत्याः पुरा देवा मनुष्या असुरा अपि ॥ ९ ॥

अधीहि भगवन् ब्रह्मेत्यूचुर्ब्रह्माणमादृताः ।
तेनोक्तास्ते ब्रह्मचर्यमूषुः संवत्सरत्रयम् ॥ १० ॥

ततोऽब्रवीत् स तान् देवान् दकारं त्वेकमक्षरम् ।
ततो मनुष्यानसुरान् तमेवोक्त्वाऽब्रवीत् पुनः ॥ ११ ॥

व्यज्ञासिष्टेति ते प्रोचुः व्यज्ञासिष्मेति तं पुनः ।
कथमित्याह वेधास्तान् देवा अग्रे तु वेधसम् ॥ १२ ॥

दाम्यतेति सनो देव प्रोक्तवानिति मन्महे ।
ओमित्यङ्गीकृतं दृष्ट्वा मनुष्या अवदंश्च तम् ॥ १३ ॥

अनुशिष्टाः वयं त्वत्तः दत्तेति प्रोक्तवानिति ।
ततस्तमसुराः प्रोचुर्दयध्वमिति सादरम् ॥ १४ ॥

वाग्देवी स्तनयित्नुर्हि ददद्देत्येव गर्जति ।
अतो दमं च दानं च दयां शिक्षेत् स मुक्तिभाक् ॥ १५ ॥

पूर्वोक्तज्ञानदार्ढ्याय साधनान्युपदिश्य सः ।
तत्साक्षात्कारसिध्यर्थमुपासां वक्ति सादरम् ॥ १६ ॥

हिरण्यगर्भदेवो यः हृदयं स समीर्यते ।
निरुपाधिकरूपेण स एव ब्रह्म कथ्यते ॥ १७ ॥

हृदयं यच्च देवश्च ब्रह्म चेति त्रयं त्विदम् ।
अक्षरत्रितयं यस्मात् हृवर्णस्यानुभावतः ॥ १८ ॥

स्वे चान्ये चैव बलिं हरन्त्यस्मै सहामराः ।
ददत्यस्यानुभावेन सर्वे सर्वं ददत्ययम् ॥ १९ ॥

यमित्यस्य तु माहात्म्यादेति स्वर्गं यतो जनः ।
हृदयं ब्रह्मरूपेण देवं ध्यात्वा सदा बुधाः ॥ २० ॥

पूज्यते सर्वभूतैः स ब्रह्मभूयाय कल्पते ।
यच्छब्दलक्ष्यं यद् ब्रह्म तन्महद् यक्षमित्यपि ॥ २१ ॥

तत्सत्यं वेद यो विद्वान् स एव भवति स्वयम् ।
सृष्टेः पूर्वं यदापः स्युस्ता सत्यमसृजन् तदा ॥ २२ ॥

सत्यं हिरण्यगर्भाख्यं स देवानसृजत्ततः ।
देवाः सत्यमुपासन्ते सत्यं तु त्र्यक्षरं स्मृतम् ॥ २३ ॥

सतीयमिति तत्रापि सत्ये तु प्रथमोत्तमे ।
मध्यं त्वनृतमित्युक्तं सत्याभ्यां व्याप्तमित्यपि ॥ २४ ॥

तद्वै जगदिति ज्ञात्वा कृत्वा सत्यात्मकं धिया ।
उपासितारं त्वनृतं न हिनस्ति कदाचन ॥ २५ ॥

यत्सत्यं तु स आदित्यमण्डले परिदृश्यते ।
दक्षिणेऽक्ष्णि तथान्योन्यं रश्मिभिश्चासुभिः स्थितौ ॥ २६ ॥

अत उत्क्रान्तिकालेऽस्य रश्मयो नोपरोधकाः ।
आदित्यमण्डलस्थस्य भूरित्येकाक्षरः शिरः ॥ २७ ॥

भुव इत्यक्षरे बाहू सुवरित्यक्षरे पदौ ।
तस्य नामाहरिति हि सैवोपनिषदुच्यते ॥ २८ ॥

अक्षिस्थपुरुषस्यापि शिर आदीदमेव हि ।
अहं तूपनिषत्प्रोक्ता चाहं वै गुह्यनामकम् ॥ २९ ॥

अयं मनोमयः प्रोक्तः भाः सत्यः पुरुषस्तथा ।
स व्रीहेर्वा यवाद्वापि ह्यणीयान् हृदये स्थिताः ॥ ३० ॥

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयस्तेन सर्बमिदं ततम् ॥ ३१ ॥

एष सर्वेश्वरः प्रोक्तः सर्वस्येशान इत्यपि ।
सोऽन्तर्यामी सर्वगश्च प्रशास्तीदं हि सर्वदा ॥ ३२ ॥

उपासन्ते चैनमेव विद्युतं वैद्युतर्षया ।
विद्युतं ब्रह्म यो विद्वान् प्रकाशाधिक्यतः स्वतः ॥ ३३ ॥

उपास्ते न स पाप्मभ्यो लिप्यते नात्र संशयः ।
एतमेवर्षयो वाचं धेनुरूपामुपासते ॥ ३४ ॥

स्वाहाकारो वषट्कारो हन्तकार स्वधा तथा ।
तस्या एते स्तनाः प्रोक्ताः देवानां द्वौ तु जीविकौ ॥ ३५ ॥

स्वाहाकारवषट्कारौ हन्तकारौ नृणां तथा ।
स्वधाकारः पितृणां स्याद् वृषः प्राणो मनोऽर्भकः ॥ ३६ ॥

एवं वाग्रूपमात्मानमुपास्ते स बृहस्पतिः ।
स सर्वज्ञो भवेत्सद्यो ब्रह्मभूयाय कल्पते ॥ ३७ ॥

तच्छब्दलक्ष्यं यद् ब्रह्म तन्महद्यक्षमित्यपि ।
तत्सत्यं वेद यो विद्वान् स एव भवति स्वयम् ॥ ३८ ॥

सृष्टेः पूर्वं यदापः स्युस्ता सत्यमसृजन् तदा ।
सत्यं हिरण्यगर्भाख्यं स देवानसृजत्ततः ॥ ३९ ॥

देवाः सत्यमुपासन्ते सत्यं तु त्र्यक्षरं स्मृतम् ।
सतीयमपि तत्रापि सत्ये तु प्रथमोत्तमे ॥ ४० ॥

मध्यं त्वनृतमित्युक्तं सत्याभ्यां व्याप्तमित्यपि ।
तद्वै जगदिति ज्ञात्वा कृत्वा सत्यात्मकं धिया ॥ ४१ ॥

उपासितारं त्वनृतं न हिनस्ति कदाचन ।
यत्सत्यं तु स आदित्यमण्डले परिदृश्यते ॥ ४२ ॥

दक्षिणेऽक्षिण तथान्योन्यं रश्मिभिश्चासुभिः स्थितौ ।
अत उत्क्रान्तिकालेऽस्य रश्मयो नोपरोधकाः॥ ४३ ॥

आदित्यमण्डलस्थस्य भूरित्येकाक्षरः शिरः ।
भुव इत्यक्षरे बाहू सुवरित्यक्षरे पदौ ॥ ४४ ॥

तस्य नामाहरिति हि सैवोपनिषदुच्यते ।
अक्षिस्थपुरुषस्यापि शिर आदीदवमेव हि ॥ ४५ ॥

अहं तूपनिषत्प्रोक्ता चाहं वै गुह्यनामकम् ।
अयं मनोमयः प्रोक्तः भाः सत्यः पुरुषस्तथा ॥ ४६ ॥

स व्रीहेर्वा यवाद्वापि ह्यणीयान् हृदये स्थिताः ।
वालाग्रशतभागस्य शतधा कल्पितस्य च ॥ ४७ ॥

भागो जीवः स विज्ञेयस्तेन सर्वमिदं ततम् ।
एष सर्वेश्वरः प्रोक्तः सर्वस्येशान इत्यपि ॥ ४८ ॥

सोन्तर्यामी सर्वगश्च प्रशास्तीदं हि सर्वदा ।
उपासन्ते चैनमेव विद्युतं वैद्युतर्षया ॥ ४९ ॥

विद्युतं ब्रह्म यो विद्वान् प्रकाशाधिक्यतः स्वतः ।
उपास्ते न स पाप्मभ्यो लिप्यते नात्र संशयः ॥ ५० ॥

एतमेवर्षयो वाचं धेनुरूपामुपासते ।
स्वाहाकारो वषट्कारो हन्तकारः स्वधा तथा ॥ ५१ ॥

तस्याः एते स्तनाः प्रोक्ताः देवानां द्वौ तु जीविकौ ।
स्वाहाकारवषट्कारौ हन्तकारो नृणां तथा । ५२ ॥

स्वधाकारः पितृणां स्याद् वृषः प्राणो मनोऽर्भकः ।
एवं वाग्रूपमात्मानमुपास्ते स बृहस्पतिः ॥ ५३ ॥

स सर्वज्ञो भवेत्सद्यो ब्रह्मभूयाय कल्पते ।
वैश्वानरो यो यमग्निर्येन दग्धं हि पच्यते ॥ ५४ ॥

अन्नः श्रुत्योर्यस्य घोषः श्रूयते मरणावधिः ।
स ब्रह्मेति सदा विद्वानुपास्ते मुच्यतेऽचिरात् ॥ ५५ ॥

अस्माच्छरीरादुत्क्रान्तो यदा वै पुरुषोऽभवत् ।
अन्तरिक्षं समासाद्य वायुमार्गे भ्रमत्यसौ ॥ ५६ ॥

तत्र छिद्रं प्रदर्श्येत रथचक्रान्तरायतम् ।
तेनोर्ध्वं क्रमते जीवः सूर्यस्य मण्डलावधि ॥ ५७ ॥

चिरं तत्र भ्रमित्वासौ कारकं छिद्रमाप्नुयात् ।
तेनैवोर्ध्वं क्रमित्वाथ चन्द्रलोकं स गच्छति ॥ ५८ ॥

तत्र स्थित्वा चिरं कालं दुन्दुभिच्छिद्रमाप्नुयात् ।
तेनोर्ध्वं तु सुसंक्रम्य सत्यलोकमशोककम् ॥ ५९ ॥

गत्वोषित्वा च सुचिरं सर्वान् भोगानवाप्य च ।
परार्ध्यकाले तस्यान्ते तेनैव सह मुच्यते ॥ ६० ॥

शरीरव्याधितापो यः परमं तप उच्यते ।
प्रेतभूमेश्च गमनमग्नौ दाहस्तथास्य वै ॥ ६१ ॥

परलोकप्रदं त्वेतद् त्रितयं त्वृषयो विदुः ।
अन्नं ब्रह्मेत्येक आहुः प्राणो ब्रह्मेति चापरे ॥ ६२ ॥

अन्नादृते शुष्यति हि प्राणः प्राणादृतेऽपि च ।
अन्नं पूयति चान्योन्यसापेक्षं जीवतो यतः ॥ ६३ ॥

एताभ्यां हि जगत्सर्वं विशते रमतेऽपि च ।
तौ जगद्धेतुकौ यस्माद् ब्रह्म तौ वेद यो द्विजः ॥ ६४ ॥

सोऽन्नमत्ति प्राणरूपः सर्वेष्वपि च जन्तुषु ।
प्राणवेत्तरि पापं यः करोति स विनश्यति ॥ ६५ ॥

प्राणमुक्थमुपासीत यस्मादुक्थमिदं जगत् ।
तदुक्थं तच्च ब्रह्मेति विदित्वोत्तिष्ठते परान् ॥ ६६ ॥

प्राणोऽवाप यजुर्वेद युज्यन्ते देवता यतः ।
युज्यन्ते प्राणिनो ह्यस्मै सायुज्यं यजुषस्तथा ॥ ६७ ॥

साम प्राणं वेद यस्तु ब्रह्मेत्येव तु यो नरः ।
यतो भूतानि सम्यञ्चि तस्मै सम्यञ्चितान्यलम् ॥ ६८ ॥

क्षत्रं प्राणं यस्तु वेद यतः सन्त्रायते जगत् ।
त्रायन्ते तं सर्वलोकाः क्षत्रोपासकमादृताः ॥ ६९ ॥

गायत्र्याः प्रथमः पादो भूरादि त्रितयात्मकः ।
ऋचो यजूंषि सामानि द्वितीयः पाद ईरितः ॥ ७० ॥

प्राणोऽपानो व्यान इति तृतीयः पाद उच्यते ।
पादं तु प्रथमं यत्तु विद्याल्लोकं जयत्यसौ ॥ ७१ ॥

तृतीयं यो विजानाति देवादीन् प्राणिनो जयेत् ।
एतद् ब्रह्मेति यो वेद स मुक्तः पूज्य एव हि ॥ ७२ ॥

अस्यास्तुरीयः पादो यः दृष्टो वेदान्तवेदिभिः ।
स एव मण्डले सूर्यस्तपन्नेव प्रकाशते ॥ ७३ ॥

एष ब्रह्मा च विष्णुश्च रुद्र ईशः सदाशिवः ।
एष एव विराडादिर्विश्वादिरयमेव हि ॥ ७४ ॥

परोरजसेऽसावदोमेति पादस्तुरीयकः ।
आदित्यवर्णं तमसः परस्ताद् यत् प्रकाशते ॥ ७५ ॥

स एवार्थो हि पादस्य तुरीयस्य बुधा विदुः ।
तद्वीर्यं तद्बलं चौजस्तज्ज्ञानं ज्ञेयमेव च ॥ ७६ ॥

एवं ज्ञात्वा तु यो विद्वान् गायत्रीं पर्युपासते ।
गायत्र्यस्येकपदी द्विपदी त्रिपदीत्यपि ॥ ७७ ॥

"चतुष्पद्यपदसि च नमस्ते तुरीयाय दर्शताय पदाय ।
परोरजसेऽसावदो मा प्रापदिति" ॥ ७८ ॥

इत्युपस्थाय यं द्विष्यात्तस्य नाम वदेत् पुनः ।
तस्य कामो मा समृद्धी देवीत्युक्ते तथास्य वै ॥ ७९ ॥

यथाग्नौ सम्प्रदह्येत क्षिप्तं तूलं क्षणेन वै ।
तथैवं वेद यत्पापं सुकृतं वान्यतः कृतम् ॥ ८० ॥

सम्प्रदह्येत् क्षणेनैव शुद्धः पूतोऽभयोऽमरः ।
विशोको विज्वरो मुक्तो ब्रह्म सन्मात्रमेव हि ॥ ८१ ॥

ईशाद्यरण्यान्तमहाटवीषु विचित्य सर्वत्र गृहीतमेकम् ।
विज्ञानमन्यत्परिभावनाय खं ब्रह्मपूर्णं परिवेदनाय ॥ ८२ ॥

उपासकानां मार्गादियाचनं पूर्वमीरितम् ।
ज्ञापनार्थं तस्य वेदः हिरण्येत्याह पूर्ववत् ॥ ८३ ॥

"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ ८४ ॥

पूषन्नेकर्षे यमसूर्यप्राजापत्यव्यूहरश्मीन् ।
समूहतेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ॥ ८५ ॥

सोसावसौ पुरुषः सोहमस्मि ।
वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ॥ ८६ ॥

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम" ॥ ८७ ॥

व्याख्यातार्थाविमौ मन्त्रौ मार्गयाचनपाचकौ ।
इति संबोध्य जनकः पुनरूचे महामुनिः ॥ ८८ ॥

सम्राडहं महाराजो विद्वानाढ्यो महानिति ।
मतिमज्ञानजां हित्वा दृष्टनष्टस्वभावतः ॥ ८९ ॥

ईशाद्यष्टोत्तरशतनिगमान्तरहस्यदम् ।
खं ब्रह्मेति महावाक्यमुपदिष्टं प्रकाशितम् ॥ ९० ॥

ऋषिरस्येश्वरादिर्गायत्रं छन्द उच्यते ।
देवता परमं व्योम हं बीजं समुदाहृतम् ॥ ९१ ॥

शक्तिः शक्तिः कामरूपं कीलकं जगदेव हि ।
स्वावशेषस्थितेरर्थे विनियोगः प्रकीर्तितः ॥ ९२ ॥

व्यस्तैः पूर्वं पञ्चतत्त्वैः समस्तैश्च कराङ्गुलीः ।
तैरेव हृदयादीनि यस्य दिग्बन्धनात् परम् ॥ ९३ ॥

ब्रह्मानन्द इति ध्यानं खमध्य इति चापरम् ।
मूलमन्त्रः पूर्वमुक्तस्तदर्थ इह कथ्यते ॥ ९४ ॥

वाय्वादि रमते यत्र वायुरः स उदाहृतः ।
निश्चलं परमाकाशः पुराणं खमिहोच्यते ॥ ९५ ॥

आनन्दपरमाकाशावभिन्नावद्वयत्वतः ।
अतःसुखं पराकाशः खं ब्रह्मेति प्रकाशितः ॥ ९६ ॥

कोटिपापा विनश्यन्ति सकृदस्य प्रपाठतः ।
खं ब्रह्मेति महामन्त्रः सर्वमन्त्रफलप्रदः ॥ ९७ ॥

प्रज्ञानं ब्रह्म संध्यायन् खं ब्रह्म त्वं सदा स्मर ।
इति संबोधितो राजा विदेहानां प्रणम्य तम् ॥ ९८ ॥

त्वं पिता त्वं हि मे बन्धुरात्मानन्दस्तवान्यतः ।
सहात्मना विदेहांस्त्वं गृह्णीष्वेत्यर्पयन्मुदा ॥ ९९ ॥

स च दत्तं समादाय पुनस्तं प्राह सादरम् ।
मद्दत्तराज्यं संरक्षन् सुखं विहर भूपते ॥ १०० ॥

इत्युक्त्वा तं समापृच्छ्य स्वाश्रमं प्रजगाम सः ।
सोऽपि राजा महानन्दनिर्भरस्वान्त आस ह ॥ १०१ ॥

॥ ओं तत्सत् ॥

इति गीता महानन्ददायिनी श्रुतिगर्भिणी ।
ब्रह्मानन्दार्यशिष्येण बोधानन्दाख्ययज्वना ॥ १०२ ॥

इति बोधानन्दगीतायाँ द्वादशोऽध्यायः ॥

NOTES

The *Upaniṣads* form a literature which reveals to us the end of the *Vedas* (Vedanta), the conclusion as well as the goal of the *Vedas*. The word *Upaniṣad* is derived from the root *sad* to sit with the prepositions *upa* and *nī* (near by). So it indicates the sense 'secret sitting' near a teacher for secret instruction. Śaṅkarācārya derives the word *Upaniṣad* as a substantive from the root *sad* 'to loosen', 'to reach' , or 'to destroy' with *upa* and *nī* as prefixes and kvip as termination. (*sader dhātor viśaraṇagatyavasādanārthasyopanipūrvasya kvippratyayāntasya rūpam idam* —Intro. to the *Bhāṣya* on *Kaṭha*). So according to him the *Upaniṣads* are so called because they destroy ignorance.

The number of *Upaniṣads* exceeds two hundred, though the tradition puts it at one hundred and eight. (See the *Muktika Ūpanisad,* where it is said that salvation may be attained by a study of the hundred and eight *Upaniṣads* 1–3–39). But the principal *Upaniṣads* are accepted to be those which Śaṅkarācārya chose to comment upon. They are *Īśa, Kena, Kaṭha, Praśna, Muṇḍaka, Māṇḍūkya, Taittirīya, Aitareya, Chāndogya* and *Bṛhadāraṇyaka*. Bodhānanda, the author of the present work follows the above traditional order in composing his *Bodhānandagītā* or *Daśopaniṣadartha-tātparyaprakāśikā*.

Chapter I

The first chapter of the *Bodhānandagīta* deals with the contents of the *Īśopaniṣad*. This *Upaniṣad* belongs to the *Śuklayajurveda*. It has only eighteen verses. Next to the *Māndūkya,* it is the shortest of the *Upaniṣads.* The *Īśāvāsya* embodies in its very opening verse the central theme of all the *Upaniṣads* namely the spiritual unity and solidarity of all existence. This chapter in the *Bodhānandagītā* contains twenty verses and gives a summary of the *Īśopaniṣad* with the *Bhāṣya* of Śaṅkara (*ŚB*) here and there.

Verse 1 Brahmānadayati is the preceptor of the author Bodhānanda. See Preface.

3 The verb '*Kṣamantu*' may be justified according to the *Pribhāṣā* "anudātte tvanimittam ātmanepadam anityam" (97). See the root *cakṣiṅ* in the *Siddhāntakaumudī.*

5 The word *pālayethāḥ* in the text for bhuñjīthāḥ in the *Ūpaniṣad* is used according to the *ŚB*. See "na hi tyakto mṛtaḥ putro bhṛtyo vā ātmasambandhitāyā abhāvāt atmānam pālayati, ataḥ tyāgena ityayam eva vedārthaḥ. bhuñjīthāḥ pālayethāḥ" under *Īśa*. 1.

Santyakteṣaṇavān–See *ŚB* 'evam Īśvarātmabhāvanayā yuktasya putrādyeṣaṇatrayasanyāsa evādhikāraḥ, na karmasu' under *Īśa*–1.

6 See "kurvanneveha karmāni". *Īśa* 2. 'āsureṣveva karmasu'

see 'asuryā nāma' 3rd *mantra*. See also *ŚB* "asuryāḥ paramātmabhāvam advayam apekṣya devādayo'pyasurāḥ" under *Īśa*–3.

7-8 See the fourth mantra "anejadekam manaso" etc.

9 See *ŚB*-"apaḥ karmāṇi prāṇinām ceṣṭālakṣaṇāni agnyādityaparjanyādīnām jvalana-dahana – prakāśābhivarṣaṇādilakṣaṇāni dadhāti vibhajatītyarthaḥ, dhārayati vā, "bhīṣāsmād vātaḥ pavatetyādiśrutibhyaḥ", under *Īśa* 4.

10 See *ŚB* - "kiñca tat dūre varṣakoṭiśatair apy aviduṣām aprāpyatvād dūra iva, tat tu antike samīpe atyantam eva viduṣām ātmatvād na kevalam dūre antike ca". Under *mantra* "tad ejati tannaijati" etc. 5.

11 See "yastu sarvāṇi bhūtāni" etc. *Īśa*. 6.

12 See "sa paryagāt śukram" etc. *Īśa*. 8.

13 See 'andham tamaḥ praviśanti ye vidyām upāsate' etc. *Īśa*. 9.

14 *asambhūtiḥ*-means *prakṛti* or matter. See *ŚB* "asambhūtim-sambhavanam sambhūtiḥ, sā yasya kāryasya sa sambhūtiḥ, tasyā anyā asambhūtiḥ; prakṛtirityarthaḥ" under *Īśa*. 12.

15 *Upāsakaśca* etc. See *ŚB* "brahmopāsīno yathoktakarmakṛcca yaḥ so' ntakāle prāpte satyātmanaḥ prāpti-dvāram yācate" under *mantra* 14.

16 See 'hiraṇmayena pātreṇa' etc. *mantra* 15.

18 See 'omkrato smara' etc. *mantra* 17.

19 See *mantra* 'agne naya supathā raye' etc.

Chapter II

Chapter two is a summary of the *Kenopaniṣad*. The *Kenopaniṣad* belong to the Tāṇḍyamahābrāhmana of the *Sāmaveda*. This *Upaniṣad* has four sections; each of the four sections has nine, five, twelve and nine verses respectively, making altogether a total of thirty-five verses. Of the four sections, the first two are in verse and the other two, in prose. Its four sections can be divided into the following topics—1) Brahman as the real source or agent, 2) the fundamental paradox entailed in knowing Brahman; 3) Knowing Brahman 'here and now' and 4) the myth of the Vedic gods and their ignorance of Brahman.

This chapter in the *Bodhānandagītā* containing forty-two verses summarises the Upaniṣad and its bhāṣya here and there. Verse 1. *Ūktipratyuktirūpā*–See *ŚB* 'praśnaprativacanalakṣaṇayā śrutyā pradarśyate keneṣitam ityādyayā'-*Kena*–1.

2 "*viṣaye patati svayam*-See" svaviṣayam pratītiḥ saṁgacchate" *ŚB*.

3–4 See *ŚB* "Śrotrādilakṣaṇam yathoktam brahma jñātvā amṛtāḥ bhavanti".

8 *Yacca vāgādibḥi*– etc. See *Kena* 1-9.

9 See 'yadi manyase sudeveti' etc., *Kena* II. 1.

19 See "na ced iha jivamśced adhikṛto vedīnna na viditavāṁstadā mahati dīrghānantā vinaṣṭir vinaśanam janmajarāmaraṇādi-prabandhāvicchedalakṣaṇā samsāragatiḥ" *ŚB Kena* II.

21 See *Kena* third Khaṇḍa.

24 See 'tadvaiṣām vijajñau tebhyo ha prādurbabhūva tanna vyajānāt kimidam yakṣam iti. *Kena* III-2.

31–39. See 'bahuśobhamānām umām haimavatīm tam hovāca kim etad yakṣam iti'. *Khanda* III. See also *ŚB*. under this *mantra*.

43 *Jīvanmukto bhaved dhruvam*–See 'apahṛtya pāpmānam avidyākāmakarmalakṣaṇam saṁsārabījam vidhūya, etc. *ŚB*. under *Kena* IV-6.

Chapter III

This chapter is devoted to the *Kaṭhopaniṣad*. The *Kaṭhopaniṣad* also called *Kāṭhakopaniṣad* belongs to the *Kṛṣṇayajurveda* (Taittirīyaśākhā). It has two chapters ; each chapter has three sections containing a total number of stanzas one hundred and nineteen. The *Kaṭha* holds a special fascination for all students of the *Upaniṣads* for its happy blend of charming poetry, deep misticism and profound philosophy: it contains a more unified exposition of Vedanta than anyother single *Upaniṣad*; its charm is heightened by the two characters of its dialogue namely old Yama, the teacher and young Naciketas, the student.

The third chapter of the *Bodhānandagīta* has sixty-eight verses and treats the content of only the first *Adhyāya* (first three vallis) of the *Kaṭha* following the *ŚB.* on it.

Verse 2. *uśan* etc. See the beginning of the *Kaṭhopaniṣaḍ* 'uśan ha vājaśravasaḥ sarvavedasam dadau' etc. *Kaṭha* I. 1. 1.

9 *Sasyavajjāyate* etc. See 'sasyam iva martyaḥ pacyate' etc. *Katah.* I. 1. 1.

11 See 'preṣyāgatam yamam amātyā bhāryā vā ūcuḥ' etc. *ŚB.* under *Kaṭha.* I. 1. 7.

21 See 'anyam varam naciketo vṛṇīṣva' etc. *Kaṭha* I. 1. 21.

27 See 'na vittena tarpaṇīyo' etc. *Kaṭha* I. 1. 27.

30 The contents of the second *Vallī* begins here. See 'anyacchreyo' nyad utaiva preyaste' etc. I. 2. 1.

34 *Paṇḍitamāninaḥ*-See 'paṇḍitam manyamānāḥ' etc. I. 2. 4.

36 See 'na samparāyaḥ' I. 2. 6.

37 See śravaṇayāpi bahubhir yo na labhyaḥ etc. I. 2. 7.

41 See 'naiṣa tarkeṇa matiḥ' I. 2. 9.

44 See 'guhām praviṣṭam durdarśam' etc. I. 2· 12.

46 *dharmādharmakṛta* etc. See 'anyatra dharmād anyatrādharmād etc. I·2. 14.

47 See 'sarve vedāḥ yatpadam āmananti' etc. I. 2–15.

50 See 'na jāyate mriyate vā vipaścit, etc. I. 2-18.

51 See 'hantā cenmanyate hantum hataścet' etc. I. 2. 19.

54 *mahāntam vibhum ātmānam* etc. See I. 2. 22.

55 See 'nāyam ātmā pravacanena labhyo' I.2-23.

57 From this verse upto the end of this chapter, the third *Valli* is treated. See 'ṛtam pibantau' etc. I.3-1.

58 See 'ātmānam raṭhinam viddhi' etc. 1.3.3.

62 See 'indriyebhyaḥ parā hyarthāḥ' etc. I.3.10.

Chapter IV

The *Praśnopaniṣad* which belongs to the ***Atharvaveda*** is dealt, with in this chapter. The *Praśna* as its name implies is an *Upaniṣad* of questions. It is an *Upaniṣad* of six questions asked by six pupils to the same teacher, the sage Pippalāda. All the pupils are intent on the inquiry into the supreme Brahman. It has six sections and each of the six sections has sixteen, thirteen, twelve elevan, seven and six verses, making altogether a total of sixtyfive verses.

The fourth chapter of the *Bodhānandagītā* has seventy-seven verses and deals with the *Praśnopaniṣad* in its full form, following the *ŚB.*

Verse. 1 See 'Sukeśā ca bhāradvājaḥ' etc. *Praśna* 1.1.

6 The first *Praśna* begings here. See 'atha kabandhī kātyāyanaḥ etc. *Praśna* I.3.

8 See 'āditya ha vai prāṇo' etc I.5.

15 Second praśna begins from this portion. See 'adha hainam bhārgavo vaidarbhiḥ, etc. *Praśna* II-1.

18 See 'tān variṣṭhaḥ prāṇa uvāca etc. II.3.

20 See 'tad yathā makṣikā madhukararājānam utkrāmantam' etc. II. 4.

26 See 'prāṇasyedam vaśe sarvam tridive yatpratiṣṭhitam' etc. II.13.

28 *āśvalāyana āgatya* etc. third *praśna* begins here. See 'atha hainam kausalyaścāśvalāyanaḥ papraccha,. III.1.

30 See 'brahmiṣṭho'sīti tasmat teham bravīmi' III.2.

34 *hṛdi nāḍyastvekaśatam* etc. See 'hṛdi hyeṣa ātmā, atra tadekaśatam nāḍīnām tāsām, śatam ekaikasya' etc. III.6.

35 *Udānastvekayā* etc. See 'athaikayordhva udānaḥ puṇyena puṇyam lokam' etc. III.7.

40 See 'prāṇam yo veda tattvena' etc, III.11.

41 Fourth praśna starts; see 'atha hainam sauryāyaṇir gārgyaḥ papraccha' etc. IV.1.

42 See kāni svapanti kānyasmin jāgarti etc., IV.1.

55 Fifth *praśna* begins. See 'atha hainam śaibyaḥ satyakāmaḥ papraccha'. V-1.

64 *Praśna* six commences here. See 'atha hainam sukeśā bhāradvajaḥ papraccha' etc. VI.1.

72 *syandamānā yathā* etc. See 'sa yathemā nāḍyaḥ syandamānāḥ samudrāyaṇāḥ' etc. VI.5.

Chapter V

This chapter deals with the contents of the *Muṇḍakopaniṣad* which belongs to the *Atharvaveda.* This *Upaniṣad* has three chapters; each chapter has two sections; each of the total six chapters have nine, thirteen, ten, twelve, ten and eleven verses respectively and altogether the *Muṇḍaka* has sixty-five verses.

The word *Muṇḍaka* is derived from the root *muṇḍ* 'to shave' It symbolises the last stage (*āśrama*) in the life of an individual namely *Sanyāsa. Muṇḍaka* classifies all knowledge into *parā* (higher) and *aparā* (lower) and describes all science, art, literature etc. as *aparā* by which the imperishable changeless reality is known.

The fifth chapter in the *Bodhānandagītā* contains forty-eight verses and deals with the *Muṇḍakopaniṣad* following the Bhāṣya of Śaṅkara.

Verse 2 '*devānām prathamo brahmā*' etc. See 'brahmā devānām atharvaṇāya jyeṣṭhaputrāya prāha' *Muṇḍaka* I, *Khanda* I, *mantra*.1.

8 See 'yathorṇanābhiḥ sṛjate gṛhyate, etc. I.1-7.

9 See 'akṣarāt sambhavatīha viśvam'. I.1.7.

12 See 'yasyāgnihotram apaśyam' etc. 1-2-3.

17 See 'avidyāyām antare vartamānāḥ svayam dhīrāḥ paṇḍitam manyamānāḥ' etc. 1-1-8.

21 See 'tadvijñānārtham sa gurum evābhigacchet samitpāṇiḥ' etc. 1.2.12.

23 Second *Muṇḍaka* first *Khaṇḍa* begins here. See 'tadetat satyam yathā sudīptāt pāvakāddhi sphuliṅgaḥ' etc. 2-1-1.

24 See 'divyo hyamūrtāḥ puruṣāḥ' etc. 2-1-2.

27 Second *Muṇḍaka* second *Khaṇḍa* commences here.

28 See 'na tatra sūryo bhāti na candratārakam' 2-2-10.

29 See 'brahmaivedam amṛtam purastāt' etc. 2-2-11.

30 Third *Muṇḍaka* starts here. See 'dvā suparṇā sayujā sahāyau' etc. III.1–1.

31 See 'samāne vṛkṣe puruṣo nimagno' etc. III.1–2.

36 See 'bṛhacca tad divyam anantarūpam' etc. III-1-7.

39 See 'yam yam lokam manasā saṁvibhāti' etc. III-1-10.

40 Third *Muṇḍaka* second *khaṇḍa* begins.

42 See 'nāyam ātmā pravacanena labhyaḥ' etc. III.2-3.

47 See 'tarati śokam tarati pāpmānam, etc. III.2-9.

Chapter VI

In this chapter the Māṇḍūkyopaniṣad which belongs to the *Atharvaveda* is dealt with. The *Māṇḍūkyopaniṣad* is the shortest of the principal *Uapniṣads*. It has no chapters or sections but only twelve verses. This *Upaniṣad* has a singular unity of theme unsurpassed in the other *Upaniṣads*. In the brief compass of its

twelve verses of condensed thought, the *Māṇḍūkya* surveys the whole of experience through a study of the 'three states' of waking, dream and dreamless sleep (*jāgrat, svapna* and *suṣupti*) and reveals the Ātman, the true self of man, the Turīya or the Fourth, as it puts it, as pure consciousness, eternal and non-dual. It proclaims in its second verse the infinite dimension of man in a pregnant utterance-one of the four *Mahāvākyas* or great atterances of the *Upaniṣads* (ayam ātmā brahmā) (this âtman-self of man-is brahman).

The sixth chapter of the *Bodhānandagītā* has twenty-five verses and deals with the contents of the *Māṇḍūkyopaniṣad* and the *Māṇḍūkyakārikās* of Gauḍapāda.

Verse 2 See 'omityetad akṣaram idam sarvam' etc. *Māṇḍūkya*. 1-2.
3 See 'jāgaritasthāno bahiḥprajñaḥ saptāṅgaḥ, etc. 3.

11 See *ŚB* 'nāntaḥprajñam iti taijasapratiṣedhaḥ' etc. under *Māṇḍūkya* verse.7.

14 See 'turiye niścito bhavati' *ŚB*. Under verse 9.

17 *dvaitam māyāmayam* etc. See *Māṇḍūkyakārikā* 'māyāmātram idam dvaitam advaitam paramārthataḥ' Kārikā-17.

19 See 'so'yam ātmādhyakṣam omkāro' etc. *Māṇḍūkya*-11.

Chapter VII

This chapter is devoted to the *Thaittirīyopaniṣad.* This *Upaniṣad* belongs to the Taittirīyaśākha of the *Kṛiṣṇayajurveda. Thaittirīyopaniṣad* has three chapters called *Vallīs* namely *śikṣā*, *brahmānanda* and *bhṛgu.* The first chapter has twelve sections and the twelve sections have altogether twenty-nine verses; the second chapter has nine sections and the sections have altogether nine verses; the third chapter has ten sections and the sections have altogether fourteen verses; altogether the *Upaniṣad* has fifty-two verses.

The Thaittirīya proclaims that the 'knower of Brahman attains the supreme' (*brahmavid āpnoti param*). It describes the five *Kośas* or sheaths (*annamaya, prāṇamaya, manomaya, vijñāna-*

maya and *ānandamaya*) that enclose and hide Brahman. This *Upaniṣad* also provides a scientific definition of Brahman as "that from which all these beings are born; by which after being born they live and into which they merge when they cease to be" (*Yato vā imāni bhūtāni jāyante yena jātānl jīvanti yatprayantyabhisaṁviśanti tad brahma*).

The present chapter of the *Bodhānandagīta* has thirtyfive verses and deals with only the *Brahmānandavollī* of the *Upaniṣad.* Verse 3. *tasmādātmana* etc. See 'tasmādvā etasmād ātmana ākāśaḥ saṁbabhūva' etc. See *Brahmānanda vallī*–Anuvāka–1.

11 See 'tasmād vā etasmād prāṇamayād' etc. *Anuvāka*–3.

12 See 'tasya yajur eva śiraḥ' etc. *ibid*

14 See 'yato vāco nivartante aprāpya manasā saha' etc. *Anuvāka*–4.

16 Fifth Anuvāka begins here.

22 See 'asad brahmeti veda' 6th *Anuvāka* ends.

29 See 'yad eṣa ākāśo raso na syāt' etc. 7th Anuvāka.

Chapter VIII

This chapter in twenty-six verses is devoted to the Bhṛguvallī of the *Taittirīyopaniṣad.*

Verse 1. See ·bhṛgurvai vāruṇiḥ varuṇam pitaram upasasāda etc. *Taittirīya*–III–*Anuvāka* 1.

4. See 'yato vā imāni bhūtāni jāyante yena jātāni jīvanti yat prayanty abhisaṁviśanti' etc. *ibid.*

9 See 'tad vijijñāsasva tad brahmeti.' *Ibid.*

,, *prāṇo bhahmetyavedayat*–See prāṇo brahmetyavādīt–Anu. 3.

13 See 'mano brahmetyavocat'–*Anu.* 5.

17 See vijñānam brahmetyavocat–*Anu.* 5.

19 See 'ānandam brahmetyavocat' *Anu.* 6.

24 See 'suvarna jyotiḥ suvarādityaḥ; *na upamārthe* etc.
ŚB on *Anu*-10.

Chapter IX

The ninth and tenth chapters of the *Bodhānandagitā* are devoted to the *Aitareyopaniṣad.* The *Aitareyopaniṣad* has three chapters. While chapters second and third have only one section each and six and four verses respectively, chapter one has three sections and each section has four, five and fourteen verses and the *Upaniṣad* has altogether thirty-three verses.

The *Aitareya* establishes the spiritual character of the absolute and proclaims the truth in, another of the four *Mahāvākyas* ie *Prajñānam brahma* (Brahman is pure consciousness).

This chapter of the *Bodhānandagītā* contains 26 verses and deals with only the first *Adhyāya* of the *Upaniṣad.*

Verse 2. See 'ātmā vā idam eka evāgra āsīt *Ait.* I.1–1·

4. See 'sa īkṣate'me nu lokā lokapālau tu sṛja iti.' *Ibid.* I–1–3.

9 '*yasmin sthitvā* etc. See 'yasmin pratiṣṭhitā' etc. I. 2–1.

15 See 'candramā manaso bhūtvā etc. I. 2–4.

16 '*Praviśacchiśnam apyatha*'. See 'retau bhūtvā śiśnam praviśan'. *Ibid.*

17 See 'etāsu bhāginyau karomīti'–*Ibid.*

18 Second *khanda* ends here.

19 See 'lokapālāśca annam ebhyaḥ sṛjā iti'–I. 3–1.

20 See I–3–10.

25 *Parokṣēṇendra* etc. See 'santam indra ityācakṣate parokṣeṇa' etc. I. 3-14.

Chapter X

The second Adhyāya of the *Aitareya* is dealt with in this chapter which contains twenty-one verses.

Verse 2. 'strīyonau prāvišat svayam'—see 'striyam siñcatyathainam janayati tadasya prathamam janma'-*Adhyāya* II, *Khanda* 1

4. See II. 2–3.

6. *tṛtīyam janma* etc.—see 'so'yam ātmā puṇyebhyaḥ' etc. II 4–4

19. Seē 'sarvam tat prajñānanetram prajñāne pratiṣṭhitam prajñānanetro lokaḥ prajña pratiṣṭhā prajñānam brahma' II–3–3.

Chapter XI

The eleventh chapter of the *Bodhānandagītā* is devoted to the *Chāndogyopaniṣad* which belongs to the *Sāmaveda*. The *Chāndogya* is the longest of the principal *Upaniṣads*. It has eight chapters. Its eight chapters have one hundred and fifty-two sections. The one hundred and fifty–two sections have altogether six hundred verses.

The *Chandogya* introduces us to charming truth-seekers like Satyakāma, Śvetaketu and Nārada and outstanding spiritual teachers like Āruṇi, Sanatkumāra and Prajāpati. In a brief utterance of deep spiritual and philosophical import, treated as another of the four *Mahāvākyas*, it states the divinity of man- '*tat tvam asi* (that thou art).

The present chapter of the *Bodhānandagītā* containing one hundred and two verses deals only with the sixth *Adhyāya* of the *Chāndogya*, perhaps, it is considered to be the most important portion of the *Upaniṣad.*

Verse 1 See 'śvetaketur hāruṇeya āsa tam ha pitovāca śvetaketo vasa' etc. *Chāndogya* VI-1-1.

8 See 'yathā saumyaikena mṛtpiṇḍena' etc. VI. 1.4.

10 First *Khaṇḍa* ends here.

11 Second *khaṇḍa* begins-See-'sadeva saumya idam agra āsit' etc. VI. 2-1.

12 See discussions in the *ŚB* under VI-2-1.

The portion from the stanzas 12 to 20 is a summary of the *Bhāṣya*.

21 See 'tadaikṣata bahu syām prajāyeti' etc. VI. 2-2.

26 See 'teṣām khalu eṣām bhūtānām trīṇyeva bījāni bhavanti' etc. VI.3-1.

27 See'tāsām trivṛtam trivṛtam ekaikām' etc. VI. 3-3.

29-30 See 'yadagne rohitam rūpam' etc. VI.4-1.

34 See 'tejośinam trethā vidhīyate tasya yaḥ sthaviṣṭho dhātustadasti'. VI.5.3.

38 See 'dadhnaḥ somya mathyamānasya yoṇimā' etc. VI.6.1.

40 See 'ṣoḍaśakalaḥ somya puruṣaḥ' etc. VI.7-1.

43 See 'tam hovāca yathā somya mahato'dhyāhitasyaikoṅgāraḥ pariśiṣṭhaḥ' etc. VI. 7-5.

49 See 'svapiti nāma satā somya' etc. VI.8-1.

50 See 'sa yathā śakuniḥ sūtreṇa prabaddho diśam diśam patitvā' etc. VI.8-2.

52 See 'tad yathā gonāyośvanāyaḥ' etc. VI.8.3.

55 See 'yathā somya madhu madhukṛto' etc. VI.9-1.

57 See 'ta iha vyāghro vā siṁho vā' etc. VI.9.3.

59 See 'asya somya mahato vṛkṣasya yo mūlobhyāhanyāt, VI. 11.1.

65 See 'nyagrodhaphalam ata āharetīdam bhagava iti' VI.12.1.

71 See 'lavaṇam etad udake' vadyāya mā prātar upasīdatha iti' VI.13.1.

80 See 'yathā somya puruṣam gāndhārebhyo' etc. VI.14.1.

87 See *ŚB* 'evam eva sato jagadātmasvarūpāt tejobannādimayam dehāraṇyam' etc. under *Upaniṣad* VI.14.2.

93 See 'puruṣam somyotopatāpinam' etc. VI.15.1.

97 'Putracoram acoram ca' see puruṣam somyotohastagṛhī tam ānayanti' etc. VI. 16.1.

Chapter XII

The twelth and the last chapter of the *Bodhānandagītā* is devoted to the *Bṛhadāraṇyakopaniṣad.* This *Upaniṣad* belongs to the *Śatapathabrāhmaṇa* of the *Śuklayajurveda.* It has six chapters; each chapter has parts which are called *Brāhmaṇams*; chaper one has six, chapter two has six; chapter three has nine; chapter four has six, chapter five has fifteen and chapter six has five *Brāhmaṇams* respectively. Altogether the *Upaniṣad* has three hundred and thirty-eight verses. In the Vth chapter of the *Upaniṣad* we get fifteen *Brāhmaṇams* containing thirty-three verses.

The Bṛhadāraṇyaka is a long one of the principal *Upaniṣads* as its name implies. Four outstanding personalities illumine its pages–two men and two women-Janaka, the philosopher–King, Yājñavalkya, the philosopher-sage, Maitreyi, the deeply spiritual wife of Yājñavalkya and Gārgī, the 'Vācaknavi' (the gifted women-speaker) and philosopher, who is foremost among the questioners of Yājñavalkya in philosophical debate. This *Upaniṣad* expounds the central theme of all the *Upaniṣads* namely the divinity of man and the psiritual solidarity of the whole universe in Brahman. It contains another of the four *Mahāvākyas* (1–4–10) namely '*aham brahmāsmi*' (I am Brahman) besides the '*ayam ātma brahma*' of the *Mahāvākya* already referred to.

The twelth chapter of the *Bodhānandagītā* contains one hundred and two verses and is devoted only to the fifth chapter of the *Bṛhadāraṇyaka* which is the most important and large portion of the *Upaniṣad.*

verse 2–3–See 'pūrṇam adaḥ pūrnamidam pūrṇāt pūrṇam udacyate' etc. *Bṛhad*–V–1–1.

9 *Prājāpatyaḥ purā devāḥ* etc. See 'trayaḥ prājāpatyaḥ prajāpatau pitari brahmacaryam ūṣur devā manuṣyā asurā' etc. V-2-1.

15 See 'tadetadaiveṣa daivī vāg anuvadati stanayitnur da da da iti damayata datta dayaddhvam iti'-V-2-3.

18 See 'eṣa prajāpatir yaddhṛdayam etait brahmaitat sarvam' etc. V.3-1.

22 *sṛṣṭeh pūrvam yadāpaḥ syuḥ* etc. See-'āpa evedam agra āsus tā āpaḥ satyam asṛjanta' etc. V.5-1.

26 See 'tad yat tat satyam asau sa ādityo' etc. V.5-2.

30 See 'manomayo'yam puruṣo' etc. V.6-1.

33 See 'vidyut brahmetyāhuḥ' etc. V.7-1.

34 *etam evarṣayo vācam* etc. See 'vācam dhenum upāsata' etc. V.8-1.

The portion beginning with the 39th verse and ending with the first line of the 54th verse is a repetition of the portion beginning with the second line of the 22nd stanza and ending with the 37th verse. These verses as found in the original Ms. are reproduced here.

54 *vaiśvānaro yo yamagnī* etc. See-'ayam agnir vaiśvānaro' etc. V.8-1.
56-60 See 'yadā vai puruṣo'smāllokāt praiti' etc. V-10-1.
61 See-'etad vai paramam tapo' etc. V-11-1.
62-65 *annam brahmetyeka āhuḥ* etc. V.12-1.
66 See 'uktham prāṇo va' etc. V. 13-1.
67 See 'yayuḥ prāṇo vai' etc. V. 13-3.
68 See 'śama prāṇo vai' etc. V. 13-3.
69 See 'kṣatram prāṇo vai' etc. V. 13-4.
70 *Gāyatryāḥ prathamaḥ pādaḥ etc.* see-'bhūmir antarikṣam' etc. V. 14-2.
"*ṛco yajūṁṣi* etc. See-ṛco yajūṁṣi sāman' etc., V.14-2.
71-79 See 'prāno'pānovyānaḥ' etc. V. 14-3-7.
84-87 See 'hiraṇmayena pātreṇa' etc. V.15-1.

श्लोकानुक्रमणी

By the same author

SANSKRIT LITERATURE OF KERALA
College Book House, Trivandrum
Rs. 30.00

The author has endeavoured to compile it with the laudable object of providing a useful guide for scholars and researchers for easy and ready reference to Sanskrit Literature of Kerala. It is also helpful for a full-fledged history of Sanskrit Literature produced in the whole of India. It serves a very useful purpose and so it is a welcome addition to the books on the subject.

Visvesvaranand Indological Journal,
Punjab, Vol. XI, 1973, p. 6.

PRAMANALAKSANAM–(ed.) published by the Department of Sanskrit, University of Kerala, 1973. Rs. 7.50.

The *Pramāṇalakṣaṇa* is a short but important treatise on Indian epistemology of the Mimāṁsa system. The text is carefully edited with critical introduction and the printing is good.

Ludwik Sternbach,
College De France,
Journal of the American Oriental Society,
Vol. 97/Number 3/July – September,
1977, p. 364.

The text is printed along with a learned Introduction, explanatory notes, indices of words and citations.

Sambodhi, Ahmedābad,
Vol. 7. No. 1 – 4, pp. 128 – 129.

The detailed introduction discusses the life and date of the author. Mr. Nambuthiri rightly rejects the tradition that Sarvajñātman was a direct disciple of Sureśvara. This is a very useful edition prepared carefully.

Adyar Library Bulletin,
Vol. XXXVII – 1973, p. 248.

The learned introduction discusses the date and the life of the author and gives a brief account of the Mimaṁsa Literature of Kerala.

The Hindu, 9th September 1973.

COLLEGE BOOK HOUSE
TRIVANDRUM